श्री–वृद्धि–नेमि–अमृत–ग्रन्थमाला=ग्रन्थाङ्कः–४५

न्यायविशारद–न्यायाचार्य–वाचकप्रवर–
श्रीयशोविजयजिद्गणिवर्यविरचितं

# श्रीगोडीपार्श्वनाथस्तोत्रम्

( भक्तिरसपूर्णं खण्डकाव्यम् )

## ( वृत्या विभूषितम् )

– प्रकाशिका –
श्री जैनसाहित्यवर्धक सभा
अमदावाद

संवत् २०१८
वसंतपञ्चमी
वीर. नि. सं. २४८८

मूल्यम् २.००

પ્રકાશક—
**શ્રી જૈનસાહિત્યવર્ધક સભા**
શેઠ સુરેન્દ્રભાઈ સારાભાઈ
**અમદાવાદ**

વિક્રમસંવત
૨૦૧૭

પ્રાપ્તિસ્થાન—
શ્રી અમૃતસૂરીશ્વરજી જૈન જ્ઞાન મન્દિર
દૌલતનગર, બોરીવલી (પૂર્વ)
**મુંબઈ–૬૬**

મૂલ્ય ૨ રૂ.

મુદ્રક—
**પંડિત પરમેષ્ઠીદાસ જૈન ન્યાયતીર્થ**
**જૈનેન્દ્ર પ્રેસ, લલિતપુર**
(જિલ્લા–ઝાંસી) ઉ. પ્ર.

## * શ્રેયોઽર્થે *

આ ગ્રંથ શાહ માણેકલાલ સ્વરૂપચંદભાઈ
તરફથી પોતાના સ્વર્ગસ્થ પિતાશ્રી
શાહ સ્વરૂપચંદ મોકમચંદના
શ્રેયોઽર્થે છપાવીને પ્રસિદ્ધ
કર્યો છે.

# –પરિચય–

સરસ્વતીના અવતાર સમા સત્તરમી સદીના મહાન્ જ્યોતિર્ધર ઉપાધ્યાયજી મહારાજ શ્રીયશોવિજયજી મહારાજ 'ઉપાધ્યાયજી' એવા અન્વર્થનામથી જૈનસમાજમાં સારી રીતે પ્રસિદ્ધ છે. તેઓશ્રીની વિરચિત નાની મોટી, સરલ ગંભીર અને અતિ–ગંભીર અનેક કૃતિઓ સુલભ છે. તેઓશ્રીના રચેલા પદ્યગ્રન્થો સાહિત્યમાં–કાવ્ય-કૃતિઓ સ્વરૂપે અનોખી ભાત આપે છે. 'શ્રીગોડીપાર્શ્વસ્તવ'નું અધ્યયન કરનારને એ હકીકત સ્પષ્ટ જણાય એમ છે.

મોટે ભાગે શિખરિણી અને અન્તમાં વિવિધ છન્દોની વાનગીનો આસ્વાદ કરાવતું આ સ્તોત્ર ૧૦૮ પદ્ય–પ્રમાણ છે. જૈનસ્તોત્ર-સંગ્રહમાં મૂળમાત્ર આ છપાએલ છે, તે અહિં ટીકા સહિત પ્રકટ કરવામાં આવેલ છે. આ સ્તોત્રનો પાઠ કરવો એ જુદી વાત છે, અને અર્થો સમજવા એ જુદી વાત છે. ટીકા વિના આ અર્થો સમજવા સુકર નથી એ અનુભવે સમજી શકાય એવું છે. મુદ્રિત આદર્શને આધારે યથોચિત સુધારા કરીને આ સ્તોત્રને વ્યવસ્થિત કર્યું છે. ત્રુટક પદ્યોને પૂરા કરવાનો પ્રયત્ન કરવામાં આવ્યો છે. એ સંયોજનનું પરીક્ષણ કરવા કરતાં સ્તોત્રપૂર્તિનો આહ્લાદ અધિક સમુચિત છે. આનો અર્થ એ નથી કે 'કોઇ આની સમીક્ષા કે પરીક્ષા કરતા નહિં' એવું કહેવામાં આવે છે. સાથે એ પણ સ્પષ્ટ છે કે ક્યાં ઉપાધ્યાયજી મહારાજની કૃતિ અને ક્યાં આ પૂર્તિ !—

આ સ્તોત્રમાં રહેલા ભાવોનો આસ્વાદ સંસ્કૃતભાષાના જાણકારોને આવે છતાં ગુજરાતી જાણનારને પણ કાંઈક સમજાય એ માટે તેનો ભાવવાહી અર્થ અહિં ક્રમબદ્ધ આપવામાં આવે છે.

"અરિહંત! ઉત્તમહિતકર સત્યસ્વરૂપ જ્યોતિર્મય આપને સદા નમસ્કાર હો, રૂપાતીત છતાં અદ્ભુત–નિર્મળસ્વરૂપવાળા અને મહાન એવા આપને નમસ્કાર હો, અનન્તા સ્તોત્રોવડે પણ ન કળી શકાય એવા શ્રેષ્ઠ નામવાળા અને ગુણવંત એવા આપને નમસ્કાર હો. 'ગોડીપાર્શ્વનાથ' એવા પ્રસિદ્ધ નામને ધારણ કરનાર પૂજ્ય એવા આપને નમસ્કાર હો–૧–કોઈ વખત મહાન્ વનમાં વસેલા હે નાથ! અત્યન્ત વિરૂપ, શત્રુભૂત ને મિથ્યા મોહઅન્ધકારથી વ્યાપ્ત એવા કમઠ–અસુરથી ખરેખર મહાકષ્ટ પ્રાપ્ત થયા છતાં ક્ષણવાર પણ આપે રોષ ધારણ ન કર્યો, ક્ષમાના અધીશ્વર આપને કોઈ–અનિર્વચનીય નમસ્કારહો–૨–સર્વે ચોસઠે ઇન્દ્રો આપની પાસે આવ્યા અને કરોડ દેવતાઓ ક્ષણપણ આપનું સાન્નિધ્ય ત્યજતા નથી (આમ-ગૌરવનું–અભિમાનનું અબાધિત કારણ છે છતાં) અપારવિલાસવાળા પરિપૂર્ણ મદને આપે ( અસીમવિલાસને માટે ) શીઘ્ર હણી નાંખ્યો. મહાન્ આત્માઓ કાર્યસિદ્ધિમાં કારણ સામગ્રીની અપેક્ષા રાખતા નથી–૩–હે ભગવન્! આપે પૃથ્વી પર વિચિત્ર માયા–દયા વિસ્તારી છતાં પણ કોઈ પણ રીતે કયાંય પણ આપ માયાને વશ ન થયા. આપે અનાદિ સમ્બન્ધ નાશ પામતો નથી એવું કોઈક કહે છે, તેને માયારહિત થઈને સતત–સદન્તર ખોટું પાડયું–૪–હે પ્રભો! આપે વિલાસોના થનગનતા નાચ બંધ કરી દીધા, આપે કોઇપણ કાર્યમાં કષાયના સમુદાયની સહાય લીધી નહિં, આપે વિરહ ન પડે એવી અને ઉત્તમહિતસહિત મુક્તિ–નિર્લોભતા પ્રાપ્ત કરી, હે નાથ! આપની વિલક્ષણતા ક્ષણ પણ સમજી શકાતી નથી–૫–હે ભગવન્! પૂર્વે શાન્ત ન રહેતું મારૂં મન ચારે તરફથી ખિન્ન

રહેતું હતું, પણ હવે દુઃખના અન્ત કરનાર સદન–ઘર સમાન આપનાં મનોહર વદનને જોઈને—જેમ મેઘને નીરખીને મોર નાચી નાચીને ખેદ વગરનો થઈને આનન્દિત થાય છે–તેમ આનન્દિત થયું છે–૬–ભવે–શંકરે કરેલ દહનરૂપ ઉપતાપને સંભારી સંભારીને કામદેવ ભવના–સંસારના શત્રુ એવા આપની સમીપે આવે છે ત્યારે પણ તે અરે ! એવી જ (દહનની) દશાને પામે છે. અર્થાત્ ભવના રિપુ આપ કામને બાળીને ભસ્મીભૂત કરી નાંખો છો. ખરે-ખર ભાગ્યહીન જનોને શત્રુ કે મિત્ર બન્ને સરખા હોય છે.-શું કહીએ, વિશ્વમાં આ પ્રકાર–રીતિ પ્રકટ જ છે–૭–હે પ્રભો ! આપે સ્નેહભર્યા કટાક્ષથી નથી કર્યું અનુરાગનું પ્રદર્શન કે આપે હાથના અભિનયપૂર્વક કોઈના પણ ઉપર નથી વરસાવ્યો અનુગ્રહ–આશી-ર્વાદ, છતાં પણ આરાધકોને ચિન્તામણીની જેમ આપ સકલસમી-હિતના દાતા છો એમ સમજીને પ્રાણીઓ આપના ધર્મમાં દૃઢ રાગને ધારણ કરે છે–૮–આ અન્યદર્શનીઓ પુણ્યોપાર્જનને અર્થે સેવાની હેવાવાળા બનીને જે ઈશ્વરનો આશ્રય લે છે, જે દેવની સેવના કરે છે–તે દેવ–નિયન્તા–ઈશ્વર ગાઢ પણે બાથ ભીડીને સ્ત્રીનું આલિંગન કરી રહ્યો છે. આવી અનુચિત પ્રવૃત્તિમાં રસવાળા દેવ પાસેથી ઉત્તમ ફળની આશા જ શી ?, જગતમાં કદી પણ દાવા-નળથી વેલડીની વૃદ્ધિ થતી નથી–૯–હે જગદીશ્વર ! જિનેશ્વર ! જ્ઞાનના દીપક રૂપ, શાન્તિના સહન સ્વરૂપ, કર્મને છેદવાને દાત-રડા સમાન, મહામોહ અને રોષ અર્થાત્ રાગ અને દ્વેષ રૂપ વિસ્તાર પામેલા વનને દગ્ધ કરવા માટે અનલ–અગ્નિરૂપે પ્રસિદ્ધ, અનેક ઉદ્દેશકોથી સ્પષ્ટ, પવિત્રપદના સ્થાનરૂપ, કલેશરહિત આપના ઉપદેશને મોક્ષને માટે હું સેવું છું–૧૦–હે દેવ ! પવિત્ર યશવાળા લોકો રસપૂર્વક અગણિત પુણ્યથી જો–આપના ચરણકમળની રજને મસ્તકે ધારણ કરે છે તો તે બુદ્ધિમાનોના સુન્દર ઘરમાં લક્ષ્મી

સ્થિર વાસ કરીને રહે છે, લક્ષ્મી તેઓની પાછળ ખેંચાઈને આવે છે ને કદી પણ ત્યજતી નથી.–૧૧–હે જિનપતિ ! જે જન હંમેશા ઉદય પામતા સૂર્યના પ્રસરતા કિરણોવાળા પ્રાતઃસમયે તાર સ્વરે આપના ઉદાર સ્તોત્રને વારંવાર ભણે છે, તેના દ્વારે જરતા મદથી સુન્દર કપોળ–ગંડવાળા હાથીઓની હાર અને દાનશીલ સુભટોની શ્રેણી શોભે છે. અર્થાત્ ઉપર પ્રમાણે સ્તોત્રનો પાઠ કરનાર રાજ-રાજેશ્વર થાય છે–૧૨–હે ભગવન્ ! આપના નામવાળું, સંસારને અપકાર કરનારૂં અને મહાલોભ તથા ક્ષોભને દૂર કરવામાં રસવાળું સ્તોત્ર જો ચિત્તમાં સ્ફૂરે તો તેવા મુનિને અજ્ઞાન અન્ધકારનો હ્રાસ થવાથી વિસ્તૃત વિકાસ મળે છે, અને માયારૂપ સમસ્ત રાત્રિ તેની સાથે દ્રોહ કરતી નથી અર્થાત્ તેને નડતી નથી–૧૩–હે પ્રભો ! મોક્ષમાર્ગના ધોરી માર્ગથી ઉજ્જડ રસ્તે ભૂલા પડેલા ભવ્ય સમુદાયને દીપક તુલ્ય પ્રકાશ ધરીને માર્ગ પર આપના વિના બીજું કોણ લઈ જાય છે. આપના પ્રભાવથી ઉપજેલ શુદ્ધ આચરણ યુક્ત કીર્તિ સમુદાય સ્વેચ્છા પ્રમાણે ભુવનને–જગતને શીઘ્ર સ્વચ્છ કરે છે. જે જગત્ કલિયુગથી મલિન છે.–૧૪–હે જગદ્‌બન્ધુ આપને વિષે પરિણત થયેલી ભક્તિ–રક્ષક બનીને સમુદ્રનાં સકલ કષ્ટને નાશ પમાડે છે. જ્યારે–સમુદ્રમાં ચપળ મોજા ઉછળતાં હોય, વેગવંત વાયુ વાતો હોય, આકાશ વાદળોથી ઘેરાએલું હોય, પ્રકાશ ઝાંખો પડી ગયો હોય, નૌકા ઝોલા ખાતી હોય, નજીકમાં ભયંકર મગરમચ્છ આદિ ફરતા હોય—એ સમયે ભયભીત થયેલા જનોનું રક્ષણ આપના વિષેની ભક્તિ કરે છે.–૧૫–હે સકલસુરપતિ–નમસ્કરણીય–ભગવન્ ! યમસમાન સિંહ, વાઘને હાથીઓના સમૂહ ભરેલી અટવીમાં એકલો પડી ગયેલો માણસ જો મનમાં પણ આપના નામનું સ્મરણ કરે છે તો તે પવિત્ર બની જાય છે ને જાણે તે પોતાનાં ઘરમાં જ ન હોય એવો અનુભવ કરે છે. અટવીમાં તેને

કોઈ પણ પ્રકારનો જરા પણ ભય લાગતો નથી–૧૬–હે પાર્શ્વજિન ! જે બુદ્ધિમાન્ દરેક મહિનાની (વદિ) દશમીને દિવસે આપનું મંત્રાક્ષરમય નામ જપે છે તેને દશેદિશામાંથી સંપત્તિ આવી મળે છે, આયંબિલની તપશ્ચર્યા કરનારને દશે પ્રકારનાં કલ્પવૃક્ષો ઇચ્છિત પૂરે છે અને નરકની દશે પ્રકારની પીડાનો તેને કદી અનુભવ કરવો પડતો નથી–૧૭–હે પ્રભો ! ભવભયની પીડાને નાશકરનારાં આપના કંઠમાં જે માણસે સુન્દરસુગંધી સઘનપુષ્પની માળાને નથી પહેરાવી તેના કંઠમાં પરલોકમાં દેવાંગના કલ્પવૃક્ષના પુષ્પની શુભમાળાને કેમ પહેરાવશે !–અર્થાત્ નહિં પહેરાવે. તેને દેવલોક નહિ મળે.–૧૮–હે ભગવન્ ! આ વિશ્વમાં તમે જ મારા પિતા છો, તમે જ મારા બન્ધુ છો, તેમ જ મારા નેત્ર છો, તમે જ મારે શરણ છો, તમે જ મારા રક્ષક છો, રાજવીઓથી નમાએલા એવા તેમ જ મારા નિર્યામક છો, હે પ્રભો ! તમને છોડીને બીજા કોઈને પણ હું દેવબુદ્ધિથી સેવતો નથી, માટે હે જિન ! મારા પર પ્રસન્ન થઈને પ્રતિદિન આપની અનન્ત સ્તુતિ કરનારા મારા પર દયા કરો–૧૯–જે મુનિ અકાર્યથી વિરમીને પોતાના મનને સ્થિર કરીને આપનાં વિશ્વવિજયી અદ્ભુત ગુણ સમુદાય વડે આપનું ખૂબ જ ધ્યાન ધરે છે તેને અહિં પણ સમતાના પ્રેમની સ્થિરતાના વિસ્તારને જિતનારી અને મોક્ષની વાનગીરૂપ પ્રશમરસથી વિલસતી ચિત્તવૃત્તિ ઉદય પામે છે. અર્થાત્ આપનાં ધ્યાનથી ચિત્ત શાન્ત અને સ્થિર થાય છે.–૨૦–હે સુખસાધન–ભગવન્ ! આપનો ધર્મ જ આ અખિલ પૃથ્વીને ધારણ કરવામાં સમર્થ છે, બાકી કોઈ કહે છે કે શેષનાગ પૃથ્વી ધારણ કરે છે તો તે બરાબર નથી, કારણ તે કોમળ ફણાઓથી વિશાળ પૃથ્વી કેમ ધારણ કરે ? કોઈ કહે છે કે દિગ્ગજો પૃથ્વીને ધારણ કરે છે તો તે પણ બરાબર નથી, કારણ કે તેઓ તો પોતાનાં મોટા શરીરના ભારથી જ કંટાળી ગયા છે, શરીરનો

ભાર જ પરાણે ઉપાડે છે તો પૃથ્વીના ભારને કેમ વહે ? કોઈ કહે છે કે કાચબો પૃથ્વીને ધારણ કરે છે તો તે પણ બરાબર નથી, કારણ કે નાનો એવો કાચબો જલચર આ પૃથ્વીને કેમ ધારણ કરી શકે ? –૨૧–હે દેવ ! આપે અગ્નિથી ઉત્પન્ન થયેલ જ્વાળાઓના સમુદાયથી બળતા–જળતા ગુણવાન નાગને ચીરાએલા કાષ્ઠમાંથી બહાર કાઢ્યો, ને સાથે કમઠ તાપસના હઠના સમૂહને પણ–(દૂર કર્યો). વિસ્તૃત યશવાળા આપે તે નાગને ઉજ્જ્વળ પંચપરમેષ્ઠિ નમસ્કાર વડે તેના પાપને છેદીને શું તુરત જ ઈન્દ્રપદવીને ન આપી, અર્થાત્ આપી–એટલે કે તે નાગ તરત જ નાગેન્દ્ર ધરણેન્દ્ર બન્યો.–૨૨–હે નાથ ! કુતુહલમાં અર્થાત્ રમત કરતાં સકલ પાંપને છેદવામાં સમર્થ એવા આપે દંભી–કમઠ તાપસના પંચાગ્નિ તપથી જન્મેલા મહારંભમય દંભોને છિન્નભિન્ન કરી નાંખ્યા એમાં કશું વિશિષ્ટ આશ્ચર્ય નથી, કારણ કે રાત્રિઓમાં પથરાએલા અન્ધકારના સમૂહોને શું સૂર્ય વિના પ્રયાસે ભેદી નાંખતો નથી ! અર્થાત્ ભેદી નાખે છે.–૨૩–હે જિન ! સામાન્યપણે વિશ્વના નિયમો જોઈએ છીએ તો તેમાં એક નિયમ એવો છે કે 'કારણના ગુણો કાર્યમાં આવે' પણ આપના યશે તેમાં પણ અપવાદરૂપ આચરણ કરી બતાવ્યું એ એક અદ્‌ભુત છે. નાગના કાષ્ઠમાંથી બહાર કાઢવા રૂપ–કારણથી ઉત્પન્ન થયેલો આપનો યશ કાષ્ઠાપસરણ–ઉત્કૃષ્ટતાથી દૂર થવાના સ્વભાવને–ધારણ કરતો નથી–૨૪–હે જિનેશ્વર ! શત્રુઓને તાપનો વિસ્તાર વિસ્તારવામાં કુશલ અને મોહનો વિનાશ કરનારા આપના પ્રતાપથી દબાયેલા કમઠની કાંતિ કરમાઈ ગઈ, ખરેખર વિસ્તૃત કાન્તિ સમૂહવાળા સૂર્યના તેજથી દબાઈ ગયેલી કાંતિવાળો ચન્દ્ર શું જરીપણ શોભાને ધારણ કરે છે ? અર્થાત્ નથી કરતો–૨૫–હે જગદ્‌વિજયી ગુણયુક્ત જિનવર ! સૂર્યની જેમ આપનો પ્રતાપ જ્યારે જગતમાં પ્રસરે છે ત્યારે—

| જિનપક્ષે– | સૂર્યપક્ષે– |
| --- | --- |
| ૧ પદ્મા–લક્ષ્મીનો વિકાસ થાય છે. | ૧ પદ્મોનો વિકાસ થાય છે. |
| ૨ અન્ધકાર (અજ્ઞાન) નાશ પામે છે. | ૨ અન્ધકાર નાશ પામે છે. |
| ૩ દોષો શમી જાય છે. | ૩ દોષા–રાત્રિ દૂર થાય છે. |
| ૪ ભવપંક (સંસારરૂપ) સૂકાઈને વિલય પામે છે. | ૪ ઉત્પન્ન થતો કાદવ સૂકાઈ જાય છે. |
| ૫ પ્રકાશ (જ્ઞાનરૂપ) પ્રકટે છે. | ૫ પ્રકાશ પ્રસરે છે. –૨૬– |

હે જિન ! જો સમજપૂર્વક આપની એક આજ્ઞા મસ્તકે ધારણ નથી કરી તો ઘણાં કષ્ટો સ્પષ્ટપણે સહન કરવાથી શું ? સારીરીતે સેંકડો આસન કરવાથી શું ? યોગ ક્રિયાના પ્રયોગો પણ–(આજ્ઞા-વગરનાં) સંસારને દૂર કરવામાં સમર્થ નથી. ખરેખર વીર્ય વગરનાં ઘણાં ઔષધો મનુષ્યોને કાર્યકર–આરોગ્ય આપનારા થતાં નથી–૨૭–હે જિન ! વિશેષ અર્થને જાણનારા જે મનુષ્યો સેંકડો રાજાઓથી પૂજાએલી આપની આજ્ઞાને શેષની જેમ મસ્તકે ધારણ કરે છે તેઓની કીર્તિ સ્પર્ધાથી આગળ આવીને સતત પ્રણામ કરતાં રાજાઓ વડે દશેદિશામાં પ્રસરે છે–૨૮–હે ભગવન્ ! જગતના સ્વામી એવા આપ સુવર્ણ–રજત અને રત્નના વિશાળ ત્રણકોટ વડે અતિ-શય રમણીય કાન્તિવાળા છો. સમવસરણની ભૂમિ પણ આપના અતિશયનું ધ્વજરૂપી શોભતી સરસ જીભ અને દુન્દુભિના અવાજ વડે ગાન કરે છે–૨૯–આપના સમવસરણમાં આવેલા દેવ–મનુષ્ય અને તિર્યંચના સમુદાયો પરસ્પર ફટાટોપ કોપને કરતા નથી તેમ પીડાને પણ ધરતા નથી, આપના પ્રભાવથી તેઓને ભય સતાવતો નથી, અનીતિ દૂર રહે છે, કેવળ તેઓ સમજુ થઈને કાન દઈને પ્રતિ સમય આપની દેશનાને સાંભળે છે.–૩૦–મને લાગે છે કે અપાયને દૂર કરનારી આપની વાણી રૂપ અમૃતનું

વારંવાર પાન કરવાને કારણે દેવતાઓ દેવલોકનું અમૃત પીવામાં ખરેખર આળસુ બની ગયા છે. ને માટે જ તેઓએ સુધાના ભંડાર સ્વરૂપ ચન્દ્ર ઉપર મધ્ય ભાગમાં રહેલા લાંછનને બહાને સ્વાધીન એવો દાટો દીધો છે.–૩૧–આપની વાણી સાંભળવાથી ભૂખનું દુઃખ અલ્પ પણ સતાવતું નથી, તરસ લાગતી નથી, દ્રાક્ષાના રસનો આસ્વાદ સાક્ષાત્ અનુભવાય છે, અને પૃથ્વી પર અનેક પ્રકારે સુધાનો સ્વાદ શીઘ્ર ન આવ્યો હોય એમ લાગે છે.–૩૨–હે જિન ! આપના ઉજ્જવળ યશસમૂહના ગાન ગાતાં એવા દેવોએ પ્રાચીન રત્નોથી એકદમ રચેલી ધર્મપર્ષદા (સમવસરણની રચના) કલ્પવૃક્ષના પુષ્પો સુગંધથી ખૂબ જ મનોહર આ રચના ત્રણે ભુવનના ભવ્ય આત્માઓને પુષ્ટ આનંદને આપે છે.–૩૩–સમસ્ત મહાપાપના પટલને ભેદી નાંખનારા, મોક્ષલક્ષ્મીની પ્રાપ્તિના સાક્ષી, વિખ્યાત ગુણરત્ન સમૂહના ઉત્પાદક એવા આપના યશને સાંભળીને અતિશય આનંદમાં આવેલો અને વારંવાર ચંચળ પાંદડાઓના બહાને શું માથું ન ધૂણાવતો હોય એવો આ અશોક વૃક્ષ જયવંત વર્તે છે.–૩૪–હે વધતા એવા કામદેવના ગર્વને નાશ કરનારા, આશ્રયથી દૂર રહેલા પ્રભો ! વિશ્વવિરોચન એવા આપની સમીપે દેવો ઢીંચણ પ્રમાણ સુગન્ધી પુષ્પોના સમૂહને સ્થાપન કરે છે. આપના પ્રભાવથી તે પુષ્પોનું બંધન પણ નીચે ચાલ્યું જાય છે.–૩૫–હે ભગવન્ ! શ્રોતાઓના સમુદાયો સમભાવે કહેલી આપની વાણીથી પોતપોતાની ભાષામાં વિરોધ વગર બોધને પ્રાપ્ત કરે છે. આપની આ યોગ સમૃદ્ધિની સ્પર્ધા કરવાને અન્ય કોઇ સમર્થ નથી, શું ! આકાશમાં વિસ્તાર પામતાં સૂર્યના તેજને પતંગિયાઓ પહોંચી શકે !–નજ પહોંચી શકે.–૩૬–હે પ્રભુ ! આપના મસ્તક પર રહેલી ઉજ્જવળ ચામરની શ્રેણી શોભી રહી છે. શું એ આપના મુખચન્દ્રમાની ચાંદની છે ? શું એ આપના પ્રકટ શરીરમાંથી પ્રસરતી કાન્તિરૂપી

યમુનામાં ક્રીડા કરતી શ્વેત હંસની હાર છે! શું એ આપના સમસ્ત પુણ્યની સમૃદ્ધિ છે? કે શું એ આપની કેવળલક્ષ્મીની હાસ્ય લક્ષ્મી છે? કે શું એ શુક્લધ્યાનની ઘટના છે.–૩૭–હે જિનેશ્વર! સિંહાસન પર વિરાજેલા, વિશાળ વાદળ સમાન શરીરવાળા, સુકૃતને આપનારા આપની સેવાને દેવો શું નથી કરતા, અર્થાત્ કરે જ છે. જેમ—કંચનગિરિના કોઈક પ્રદેશમાં નન્દનવનના મનોહર સ્થળે રહેલા પ્રિયંગુવૃક્ષને ભ્રમરના સમૂહો શું નથી વીંટળાઈ વળતા, અર્થાત્—વીંટળાઈ વળે છે તેમ.–૩૮–હે જિન! અધિકકાન્તિવાળા આપના મુખ સ્વરૂપ બનીને ચન્દ્રમા તો સુખી થઈ ગયો, એટલે હવે ગ્રહણની પીડા મારે એકલાને જ માથે આવી પડી એમ સમજીને સૂર્ય સામર્થ્યથી–હે નાથ! ચિત્તને સુખકર એવા ભામંડલને બહાને–અત્યારે આપના મસ્તકનો આશ્રય કરીને રહ્યો છે. –૩૯–હે વિભુ! આકાશમાં આપની સમીપે એકદમ દુન્દુભિનો અવાજ થાય છે જાણે એ સ્ફૂરાયમાણ કેવલલક્ષ્મીના લગ્નના દિવ્ય ઉત્સવને કહેતો ન હોય! અથવા એ ત્રણે જગતના લૂંટારા કામદેવને જીતીને મેળવેલી વિજય—લક્ષ્મીના તાંડવ–નૃત્યને કહેતો ન હોય! અથવા સતતપણે વિશેષે કરીને આપના તેજના સ્થિર પ્રસારને કહેતો ન હોય! એવો જણાય છે.–૪૦–હે ભગવન્! પ્રેમથી પરિપૂર્ણ એવા દેવેન્દ્રોએ પોતાના પવિત્ર હાથવડે ધારણ કરેલા આપના મસ્તક પર ખૂબ જ શોભી રહ્યા છે. ત્રણે વિશ્વના વિજય માટે કરેલા અદ્‌ભુત વ્યવસાયનું એ સૂચક પરમ ચિહ્ન છે. અને પ્રસાર પામતાં—ત્રણે પ્રકારના (આધિભૌતિક–આધિદૈવિક અને આધ્યાત્મિક) તાપને દૂર કરવાથી ઉત્પન્ન થયેલ સૌભાગ્યનું એ સ્થાન છે.–૪૧–હે પરમાત્મન્! નારીના વિલાસને બીજાઓ પરાભૂતિ (ઉત્કૃષ્ટ વૈભવ) પરમોહવ્યવસાય (ઉત્કૃષ્ટરાગપ્રવૃત્તિ) રૂપ માને છે અને આપ પણ તેને પરાભૂતિ (પરાભવ) અને પરમોહવ્યવસાય

(પરમ વિચારણીય વ્યવહાર) માનો છે, આમ બધું મળતાપણું હોવા છતાં તેઓ સાથે આપની તુલનાને ઉત્તમ કવિઓ નથી કરતા એ એક કુતૂહલ છે.–૪૨–હે નાથ ! અનન્ત વ્યવસાય કરવાની કુટેવથી વિશ્વને ઉત્પન્ન કરવું, નાશ પમાડવું અને રક્ષવું એવી ક્રીડાની લજ્જા જગતમાં આપે નથી આચરી. કોપ, મિથ્યાઆરોપ, અભિમાન મદિરાના ઉન્માદ, મોહ, અને દ્રોહને કદી પણ આપે ધારણ કર્યા નથી, માટે જ આપ વિશ્વને સેવનીય છો.–૪૩–હે દેવ ! બીજાઓ મહામોહને પરવશ પરકાયપ્રવેશરૂપ ભૂતાવેશને કલેશને વશ વિરૂપ રહે છે. આવા પ્રકારની લીલા આપને નથી એટલે અધીરતાની વાત પણ આપની સમીપે દીન થઈને વિલીન થઈ ગઈ છે.–૪૪–હે સર્વજ્ઞ! અરે આ દુર્બુદ્ધિઓ સામાન્ય હિતના દાનનો ઉલ્લેખ કરીને બીજાઓને આપની સુન્દર ઉપમા આપે છે, શું તેઓ વિષ–વૃક્ષોમાં કલ્પવૃક્ષની તુલના નથી કરતાં અર્થાત્ કરે છે. પાપીઓના પ્રલાપ ખરેખર મદિરપાન પૂર્વક થયેલા હોય છે અર્થાત્ ઉન્મત્તપ્રલાપ હોય છે.–૪૫–હે નાથ ! જેમ રાત્રિઓથી પ્રભાતમાં, તુચ્છ બોરડીઓ કરતાં કલ્પવૃક્ષમાં, વિષ કરતાં અમૃતમાં, ચણુ પાની કરતાં સમુદ્રમાં, પર્વત કરતાં મેરુમાં, હરિણ કરતાં હાથીમાં ગુણ–સમૃદ્ધિની વિશેષતા છે તેમ અન્ય દેવો કરતાં આપમાં ગુણ–સમૃદ્ધિની અતિશયતા છે–૪૬–હે પ્રભુ ! સકલચન્દ્રને જીતનારૂં આપનું પ્રસન્ન મુખ વિજયવંત વર્તે છે, કમલપત્રને હરાવનારા કરુણાભર્યા આપના બન્ને ચક્ષુઓ શોભે છે, આપનો અંક સ્ત્રીના પરિચયરૂપ કલંકથી કલંકિત નથી, એ પ્રમાણે આપની મૂર્તિની (કાયાની) કાંતિ પ્રશમરસના વિકાસને આપનારી છે–૪૭–હે પારગત ! આપના શરીરમાં રહેલી સ્ફૂર્તિ–પ્રસન્નતા જગતના જીવોને સંસાર સાગરથી પાર કરનારી નૌકા છે, શાંતિ આપનારી છે, દિનાનુદિન વધતા સેંકડો સુકૃતને સદ્યઃ પુષ્ટ કરનારી છે, અતિશય ચમકતા નવીન નીલમણિની કાંતિના ગર્વને દૂર કરનારી છે.

–૪૮– હે જિન આપની કાયાની કમનીયતાને વિલોકીને સમ્યગ્‌દષ્ટિ આત્માઓની આંખો અદ્‌ભુત રસથી યથેચ્છપ્લાવિત–સ્નાત થાય છે અને મિથ્યાદષ્ટિઓની દષ્ટિ વિષવ્યાપ્ત બને છે, પણ એથી શું ? શું વિશ્વમાં સૂર્યથી ઘૂવડ સિવાય બીજા બધા આનન્દ નથી પામતા ? પામે જ છે.–૪૯–હે જિન ! આપની આ મૂર્તિની કાંતિને નીરખવા માટે અપાયના પડલ વગરનું મનુષ્યોનું નિર્નિમેષપણું–આંખો મીંચાવ્યા વગર ટગર ટગર જોયા કરે એવી સ્થિતિ–સતત સમુચિત છે. બાકી વિષય–રાગમાં મલિનતાવાળું દેવપણાનું તે નિર્નિમેષપણું સારૂં નથી. અથવા ધ્યાનની શુભ દષ્ટિવાળો સકલ નિર્નિમેષને નિષ્ફળ કરે છે–૫૦– હે વીતરાગ ! મારૂં હૃદય આપના ધ્યાન જળમાં સ્નાન કરીને સ્વભાવ—સુન્દર હો, મારી વિચિત્ર વાણી આપના ગૌરવની સ્તુતિ કરવાવડે પવિત્ર બનો, મારી કાયા આપને સતત પ્રણામ કરવાથી નિર્મળ કાન્તિયુક્ત થાવ, વિવેકના શુભ ઉદયવાળું આપનું એક જ સ્વામીપણું વિજયવંત વર્તો–૫૧–હે પાર્શ્વનાથ ! જેમ શેષનાગ તેજવડે પુષ્ટ શોભાને સુખવાળી ક્ષમાને–પૃથ્વીને ધારણ કરે છે ને ફણાના મણીકિરણોવડે અન્ધકારનો નાશ કરે છે–ને એ રીતે અહીનત્વ–(અહિ–સર્પને તેનો ઈન–સ્વામી) પ્રસિદ્ધિને ધારણ કરે છે તેમ તમે એવા પ્રકારની ક્ષમાને–ક્ષાન્તિને ધારણ કરો છો અને છત્રરૂપે રહેલા નાગના ફણાઓના મણીકિરણોથી અન્ધકારને દૂર કરો છો ને તેથી અહીનત્વ (હીન નહિં એવા સ્વરૂપની) પ્રસિદ્ધિને ધારણ કરો છો. છતાં આશ્ચર્ય તો એ છે કે આપ ક્ષણવાર પણ નાગની જેમ તૃષ્ણાનો આશ્રય કરતા નથી, નિર્બાધપણે અધોવાસે વસતા નથી અને સત્ય સિદ્ધિને આપો છો.–૫૨–હે અર્હન્‌ ! આપને વિષે દોષો પુષ્ટિ વગરના છે, ગુણ–સમુદાય આપનું શરણ કરીને રહ્યા છે. શોભા ક્ષોભવગર વિલસે છે, હૃદય તો શાન્ત–ક્ષોભરહિત છે. શરીર પ્રભાનું પાત્ર છે. મુખ

અતિશય લાવણ્યનું મન્દિર છે આપની મુદ્રા અતુચ્છ છે—પરમોત્તમ છે. સમવસરણમાં આપની વાણી–સુધા વર્ષતી છે.–૫૩–હે પંડિતોના આશ્રય–પરમેશ્વર ! આપે વગરબાણે કેવળગુણોથી (ગુણ –દોરી) જ વિશ્વને જીતી લીધું, વળી વગર રાગે (રંગે) જગતના ભવ્યાત્માઓનું ચિત્ત રંગી નાંખ્યું. મોહ વગર આપ મુગ્ધ–સુન્દર ( મુગ્ધ–મૂઢ) બન્યા, વિરૂપાક્ષાકાર વગર (વિરૂપાક્ષ–શિવ તેનો આકાર –વિકલ ઈન્દ્રિયાકાર) અંગીકૃતશિવ–મોક્ષ મેળવનારા (પાર્વતીને સ્વીકારનાર) થયા, વિકારને ગાળી નાંખનારા આપ વિજયવંત વર્તો છો.–૫૪–હે વિશ્વેશ્વર ! આપના ગુણો પ્રસાર પામતા શરચ્ચન્દ્રના કિરણોની સ્પર્ધા કરે છે અર્થાત્ તેથી પણ અધિક ઉજ્જ્વળ છે–છતાં તે ગુણોવડે જગજ્જીવોનું હૃદય સ્પષ્ટપણે રક્ત (અનુરાગી–લાલ) કેમ બને છે. ઘોર નિયમને વિષે આપનું ચિત્ત વજ્ર કરતાં પણ કઠોર હોવા છતાં વિશ્વમાં તે કૃપાથી કોમળ શાથી છે–આ અદ્ભુત છે.–૫૫–હે પરમયોગી ! મુનિઓનાં ધ્યાનસમુદ્રમાં આપના મુખચંદ્રના દર્શનરસથી પ્રશમરસનાં પ્રસરતા તરંગો ઉછળે છે અને તેમાં આપના ઉચ્ચ ઉજ્જ્વળ–ગુણ સમુદાયો—કે જે હિમાલયની કાન્તિના અભિમાનને ભેદી નાંખવામાં સારી રીતે કુશળ છે અને મદનસેનાને જેણે હણી નાંખી છે તે—ખૂબ જ ફીણરૂપ ફેલાય જાય છે–૫૬–હે ત્રણ જગત્‌ના મુકુટ સ્વરૂપ સ્વામી ! આપના પ્રસિદ્ધ ગુણરૂપ હંસો કે જે ધ્યાનરૂપ સુધારસથી ભરેલા આ માનસને (મનરૂપ માનસરોવરને) લાંબા સમય સુધી સેવે છે–તે–બીજાના યશરૂપ મોતી સમૂહનો આહાર કરીને અતિ ઉજ્જ્વળ થઈને શું ગુણદોષરૂપ દૂધ–જળના વિવેકને નથી કરતા–અર્થાત્ કરે જ છે. –૫૭–હે ભગવન્ ! લોક અને અલોકમાં રહેલું અપરિમિત અને અનન્ત સંપૂર્ણ આકાશ પણ દર્પણની જેમ આપના એક જ્ઞાનમાં સમાઇ જાય છે. જો એક જ્ઞાન પણ આકાશ કરતાં વધી જાય છે તો

આપના અનન્તગુણોની તુલના કેવી રીતે થઈ શકે ? એટલે તે અતુલ છે–૫૮–હે જિનેશ્વર ! ચન્દ્ર એ મષીપાત્ર–ખડીયો છે. કિરણુસમૂહ એ લાંબી લેખણુ છે, પૃથ્વીપટ એ પત્ર છે ને તારાગણુ એ કુશળ લેખક છે. આપના અનન્તગુણો લખતાં કયારે પાર આવશે ? એથી ઉતાવળથી થયેલી ઉત્સુકતાને કારણે ચન્દ્રરૂપ ખડીઓ વાંકો થઈ ગયો ને તેમાંથી શું આકાશગંગા પ્રકટી–૫૯–હે પરમાત્મન્ ! ગુણો આપની વિષે સ્થિર થઈને રહ્યા છે છતાં પણુ તે શું ત્રણે જગતને ઉજ્જવળ કરવા માટે સતત વિશ્વમાં ભ્રમણુ કરે છે. ગુણુથી ગૌણુનો જન્મ થાય છે એ ખૂબ જ પ્રસિદ્ધ છે છતાં તે મિથ્યા છે, કારણુ કે કયાંય પણુ આપના ગુણુ ગૌણુ ભાવને પામ્યા નથી–મુખ્ય જ રહ્યા છે. –૬૦–હે જિનવર ! અન્યોના દોષો આપનામાં ગુણુરૂપે પરિણુમે છે અને આપના ગુણો બીજાઓનાં દોષરૂપે પરિણુમે છે, એટલું શું આપનું શુકલ ધ્યાન દોષસમૂહને ઉજ્જવળ કરે છે અને અન્યોનું દુર્ધ્યાન ગુણુ સમૂહને કલુષિત કરે છે–૬૧–હે નાથ ! આત્માના પ્રદેશો અસંખ્યાતા છે અને આપના ગુણો અનન્તા છે, અસંખ્યમાં અનન્તનો સમાવેશ કઈ રીતે થાય એ કાંઈક વિચારણીય છે. છતાં આપે તો એક પ્રદેશમાં પણુ અનન્તગુણોનો સમાવેશ કર્યો છે તે જોઈને આપની વિલક્ષણુતા પંડિતોની બુદ્ધિને પણુ ચકિત કરે છે –૬૨–હે સર્વજ્ઞ ! વિધાતા આકાશમાં ચન્દ્રનાં અમૃતબિન્દુની રેખાઓ કરી કરીને આપના ગુણોની ગણુયા કરે છે ને તે તારારૂપે દેખાય છે. દરેક રાત્રિના પ્રહરો આ રીતે ગણુવામાં ચાલ્યા જાય છતાં વિધાતાની તે લીલા પૂરી થતી નથી, એટલે ચન્દ્ર ખાલી થતાં ઘટતાં વળી તેમાં તે ફરી ફરી અમૃતરસને ભરે છે–૬૩-હે પરમેશ્વર ! આપનો ઉજ્જવળ યશ સમૂહ સંપૂર્ણ વિશ્વને શ્વેત કરે છે એટલે હવે રાહુનો પ્રકાશ શ્યામ નથી, ભ્રમરની શ્રેણી સફેદ છે, કાગડા-વરૂ

અને કોયલોના આકારો ધવલ બગલાની પંક્તિ જેવો જણાય છે અને અંજનગિરિ વગેરે પર્વતો કૈલાસ પર્વત રૂપ બની ગયા છે. –૬૪–હે ભગવન્! આપના અતિ ઉજ્જ્વળ યશવડે ત્રણે જગતને ખૂબ જ શોભાવ્યું છે, તેથી એવી કોઈ તિથિ નથી કે જે પૂર્ણિમા ન હોય! અર્થાત્ દરેક તિથિ પૂર્ણિમારૂપ થઈ ગઈ છે એટલે કુહૂ—અમાસ નામમાત્ર રહી ગઈ છે ને તેણે કોયલના મુખમાં પરાણે શરણ સ્વીકાર્યું છે–પરમુખવસીને તે હવે વિલસી રહી છે અર્થાત્ હવે તો કોયલ જ કુહૂ – કુહૂ કરે છે, અન્ય કોઈ પ્રકારે તેનું સ્થાન રહ્યું નથી–૬૫–હે જિન! આપના ઉજ્જ્વળ યશસ્વરૂપ ક્ષીરસમુદ્રમાં આકાશ મત્સ્યરૂપ બનીને રહે છે. ચમકતા તારાઓ ખરેખર જલબિંદુ સમા શોભે છે. નરક એ આવર્ત છે. હિમાલય મહાદેવ અને ચન્દ્રની ત્રિપુટી એ ફીણની શોભાને ધારણ કરે છે. –૬૬–હે જિનવર! આ વિશ્વરૂપી પ્રયાગતીર્થમાં ઉછળતા રસવાળી, હિમાચલ અને ચન્દ્ર સમી શુભ્ર આપની કીર્તિરૂપ ગંગા સતત વહે છે અને બીજા તીર્થંકોની સઘન મેઘસમી શ્યામ સકલ કુકીર્તિરૂપ યમુના વહે છે બન્નેની વચમાં કિરણ સહસ્ર રૂપ સરસ્વતી પડે છે–૬૭–હે નાથ! પૂર્વે વહાણ સમાન આપનું શાસન મળ્યું ન હતું, હવે મળ્યું છે તો મન મને વાંદરવેડા કરાવે છે, છતાં પણ તેથી શું થશે? એવી ચિન્તા મને થતી નથી કારણ કે સંસારમાં ચિન્તામણી કરતાં પણ વિશેષ પ્રભાવવાળા આપ મને ખરેખરા કપ્તાન મળ્યા છો–૬૮–હે નાથ! આપે રાગ–સમુદાયને શીઘ્ર પૂરેપૂરો તિરસ્કારને પમાડયો છે, હવે હું તેને હાથે ચડયો છું એટલે તે મને ક્રોધમાં આવીને ખૂબ જ પીડે છે, કારણ કે હું આપનો છું અને આપ મારા છો એ તો પ્રસિદ્ધ છે માટે આપ મારૂં રક્ષણ કરો નહિં આપનું ગૌરવ કેમ રહેશે!–૬૯–હે પ્રભો! આપને સેવકોની કોઈ ગણત્રી જ નથી. અને મારે તો આપ એક

જ છો, એટલે આપના સિવાય બીજા કોને હું મારા હૃદયની વાત કહું, માટે ઉદાસીનતાને દૂર કરીને મારી મલિનતાને દૂર કરો અને ભવવનથી મને આપની નિકટમાં લઇ જાવ–૭૦–'દુર્જનને દંડવા જોઈએ' એવી નીતિ હોવા છતાં પણ હે પરમાત્મન્! આપે નીચ, અધમ, કષ્ટ ક્રિયા કરનાર અને આપને પરાણે અતિશય ઉપદ્રવ આપનાર કમઠ ઉપર પ્રણયભરી દૃષ્ટિ રાખીને તેનું પાપ શાંત કર્યું. ખરેખર પરમાત્મા ક્યારે પણ દુષ્ટાત્મા થતા નથી–૭૧–હે સ્વામિન્! પ્રિયંગુવૃક્ષોનું રૂપ કે મરકતમણીઓનું સ્વરૂપ કોઈપણ રીતે આપના રૂપની સાથે સ્પર્ધા કરવા સમર્થ નથી, કારણકે વિશ્વમાં જે કોઈ નીલરૂપ પરમ સુન્દર પરમાણુ હતાં તેથી આપનું રૂપ રચાયું છે, એવું સ્વરૂપ અન્યત્ર ક્યાંય પણ જોયું નથી તેમ સાંભળ્યું પણ નથી.–૭૨–હે પ્રભો ! કોઈપણ શ્લોકમાં વર્ણો ગણત્રીનાં જ હોય છે જ્યારે આપનો એકવર્ણ–યશ વિશ્વમાં સમાતો નથી, એટલે શ્લોક વડે આપને વર્ણવવા એ શક્ય નથી, માટે જ યોગીશ્વરો આપને ધ્યાનવડે પ્રાપ્તકરે છે–૭૩–હે પ્રભો ! કોઈ પુણ્યોદયથી મારૂં મન ક્ષણવાર પણ આપના ચરણકમલમાં આવે ત્યારે આપ મારા પર મોટી દયા કરજો, આપ તેના પર જમણી આંખે ન જોતાં પણ ડાબી આંખે નીરખજો, ભવ્યાત્માની સુન્દર પ્રાર્થના ક્યારે પણ અફળ જતી નથી. જમણી આંખ સૂર્યની છે એટલે વિકસિત કમળમાંથી મનરૂપ ભ્રમર ઉડી જાય અને ડાબી આંખ ચન્દ્રની છે એટલે મુકુલિત–મીંચાએલ કમળમાં તે બંધાઈ રહે –૭૪–હે ભગવન્! ભક્તિના અધિકારથી આપની પાસે એટલું જ માગું છું કે પ્રથમ આપ સૂર્ય બનીને મારા હૃદયકમળને વિકસિત કરો, પછી ભ્રમર બનીને તેમાં પૂરેપૂરો વાસ કરો ને પછી ચન્દ્ર બનીને તેના પર કિરણોની વર્ષા વરસાવો–બસ બીજું કાંઈ મારે જોઈતું નથી.–૭૫–હે સ્યાદ્વાદિન્! પ્રભાત સમયે સૂર્યની વિસ્તૃત પ્રભા તારાઓને દૂર

કરે છે જ્યારે આપની પ્રભા સર્વમુનિવરોરૂપ તારા પંક્તિને બહાર લાવે છે. સૂર્ય કમળનો-વિકાસ કરે છે પણ કુવલયનો-કુમુદનો નહિ, પ્રૌઢપ્રતાપવાળા આપ ભવ્ય કમળને અને કુવલય-પૃથ્વીમંડળ-જનનેને પ્રફુલ્લિત કરો છો-૭૬-હે પાર્શ્વનાથ ! આપનો વર્ણ નીલ છે તો પણ આપનો વર્ણ-યશ ત્રણે જગતને ઉજ્જવળ કરે છે-એ કાંઇ આશ્ચર્ય નથી, આશ્ચર્ય તો એ છે કે એમ છતાં આપ અવર્ણ-અરૂપી શાથી થયા, ખરેખર પ્રભુની વિચિત્રતા વિશ્વને આશ્ચર્યકારી હોય છે-૭૭-હે અભયદ! વિશ્વમાં આપ પ્રામાણિક પુરુષો વડે ભવ્યજીવોને અભય આપનારા છો એ પ્રમાણે પ્રસિદ્ધ થયા છો, જો હું ભવ્ય છું તો શા માટે મને ભયથી દૂર નથી કર્યો અને જો અભવ્ય હોઉં તો આપના ચરણકમલમાં આવ્યો જ ન હોત, માટે મારા ભયને દૂર કરીને આપ આપના 'અભયદ' એવા નામને સંપૂર્ણ સાર્થક કરો.-૭૮-હે પરમેશ્વર ! આપની સમીપ મેં લાંબા સમય સુધી નાચ નાચ કર્યું છે, જો તેથી આપ પ્રસન્ન થયા હોતો મને મારૂં ઇચ્છિત દાન આપો, અને જો આપ પ્રસન્ન ન હો તો ભવરંગમંડપમાંથી મને એકવાર પણ-અયોગ્ય ગણીને દૂર કરો. સાત રાજલોક ઉપર-સાતમે માળથી આપ-રાજરાજેશ્વરની જેમ સર્વ જોઈ રહ્યા છો.-૭૯-હે જિનવર ! પૂર્વજન્મમાં હું આપની સેવામાં આસક્ત હતો ને તેથી જ આ જન્મમાં આપના ચરણકમળને પામ્યો છું. આપને એકવાર પણ જેણે નમસ્કાર કર્યો છે તે જીવો તરી ગયા છે ને હું કેમ નથી તર્યો તેનું હે ભગવન્ ! કારણ મને શીઘ્ર સમજાવો-૮૦-હે વીતરાગ ! આપ પ્રથમ રોષરહિત થયા ને પછી સર્વકર્મને હણ્યા તો રોષ વગર શત્રુસમૂહનો વિનાશ આપ કઈ રીતે કર્યો ! આ આશ્ચર્ય છે કે આપના ચરિત્રનો પ્રભાવ છે. ખરેખર પરમ વિશુદ્ધ આત્માને નીતિ તંત્ર કાંઇ પણ આડા આવતા નથી-૮૧-હે શ્રીમાન્-પરમાત્મન્ ! વિશ્વમાં વિશિષ્ટ પુરુષોનાં પ્રણામ

સમ્પત્તિની પ્રાપ્તિ અને ઉચ્ચ સ્થાનની સ્થિતિ એ ત્રણ મહામાનને ઉત્પન્ન કરનારા છે. આપને દેવેન્દ્રો નમન કરે છે, સમવસરણમાં અતિ ઉચ્ચ સ્થાને આપ વિરાજો છો અને ચોત્રીશ અતિશયની પરમ લક્ષ્મી આપને વરી છે છતાં માનનો અંશ પણ આપમાં નથી એ અદ્‌ભુત છે–૮૨–હે જિનેશ્વર ! ગુણ શ્રેણી પર આરૂઢ થયેલા આપ શીઘ્ર માયારહિત થયા, છતાં પણ અખિલ ભુવનમાં આપની માયા–દયા ફેલાએલી છે. અહો ! આપનું અનુસરણ કરીને માયા શબ્દ પણ કોઇ અદ્‌ભુત માયા ધારણ કરે છે અને દયારૂપ અર્થને વિસ્તારે છે–૮૩હે ભગવન્ ! કષાયના અંશ રૂપ–ચોથા ભાગ રૂપ લોભના અસંખ્યાતા ખંડ આપે કર્યા ને પછી આપ નિર્લોભ બનીને તીર્થંકર થયા–છતાં એ અદ્‌ભુત છે કે બાહ્ય અને અભ્યંતર અનેક પ્રકારની ઉત્કૃષ્ટ સંપત્તિ આપને પ્રાપ્ત થઇ છે. આ આપનું લોકોત્તર ચરિત્ર છે એમ લોકોને સમજાય છે–૮૪–હે પ્રભો ! આપ કર્મથી રહિત–કર્મધારય સમાસ રહિત એવા ખરેખર દીનાનાથ–દીનોના સર્વ પ્રકારે નાથ છો, ને હું પણ કર્મથી યુક્ત–કર્મધારયસમાસ વડે દીનાનાથ–દીન અને અનાથ છું. માટે મારા પર કૃપા કરીને મારા પાપ સમૂહને કાપીને એવું કરો કે જેથી આપની જેમ હું પણ ષષ્ઠીસમાસ– છટ્ઠી લેશ્યાને પ્રાપ્ત કરૂં –૮૫–હે પ્રભો ! હું સકલ વિશ્વના અહિતપણાને કારણે વિશ્વામિત્ર વિશ્વશત્રુ છું અને આપ જનના સંતાપ દૂર કરો છો માટે વિશ્વમાં સર્વના મિત્ર છો, અકાર–આકારને દૂર કરીને મારા પર એવી વિશિષ્ટ કૃપા કરો કે જેથી હું પણ આપની જેમ વિશ્વમાં શીઘ્ર ખરેખર મિત્ર બનું–૮૬–હે જિનવર ! મારી સમાધિ–સમસ્ત આધિને દૂર કરીને કરીને મને સમાધિ (યોગ સમાધિ)ને આપો, અસાર અને અરિઓના સમૂહથી યુક્ત એવા મને શીઘ્ર શ્રેષ્ઠ સાર–સુન્દર કરો,

મારી પરાભૂતિ–પરાભવ દૂર થાવ અને પરાભૂતિ–પરમ વિભૂતિ સમીપે આવો, ખરેખર આપની ભક્તિના વૈભવથી અવળું હોય એ સવળું બની જાયછે–૮૭–હે પ્રભુ ! વાંછિત દાયક આપ એકજ જો ચિત્તમાં સતત રહેતા હો તો–પ્રતિદિન કરોડો સુવર્ણ આદિના દાનની જરૂર નથી, વિવિધ તપશ્ચર્યા વ્યર્થ છે, શુભ ભાવના ભાવવી નકામી છે.–૮૮–હે ભગવન્ ! આપનું ગીત ગાયું નથી, વળી સાંભળ્યું પણ નથી, આપનું કલ્પિત–પ્રતિમા આકારે રહેલું રૂપ પણ નીરખ્યું નથી, ધૈર્ય ધારણ કરીને મનથી આપનું ધ્યાન ધર્યું નથી. તો હું આ સંસારને કેવી રીતે તરીશ ! એની કાંઈ સમજ પડતી નથી–૮૯–હે પરમેશ્વર ! મહાન્ વ્યાધિઓનો વિનાશ કરીને આપે સકલ માનસિક પીડાઓના સમૂહને શાંત કર્યા તેના પ્રભાવે આત્મામાં પ્રશમ પ્રકટ્યો અને સર્વસત્ય વૈભવની પ્રાપ્તિ થઈ-એવા હે પરમેશ્વર ! આપે સર્વ શ્રેષ્ઠ–ઉત્તમોત્તમ પદ પ્રાપ્ત કર્યું અને એ રીતે આપે વિશ્વમાત્રમાં પ્રયત્નો જો યથાર્થ કરવામાં આવે તો તે સફળ થાય છે એમ સિદ્ધ કર્યું.–૯૦–હે પ્રભો ! સદ્‌ભાગ્યના ઉદયથી મળેલા શુદ્ધધર્મમાં આસક્ત, અને આઠ પ્રકારના કષ્ટને આપનારા નિબિડ કર્મના વૃતાંતથી દૂર થયેલો હું દિવસ અને રાત આપનું જ ધ્યાન ધરતો ને શ્રદ્ધાથી રોમાંચિત્ત શરીરવાળો ખરેખર ક્યારે મારા સમયને પસાર કરીશ–૯૧–હે પ્રભો ! આપના યશરૂપ સરોવરમાં સ્નાન કરીને ત્રણે જગત્ ચન્દ્રમના કિરણ સમાન વિશુદ્ધ સર્વ પ્રકારે થયું છે. છતાં આપનો વર્ણ પલટાયો નથી એ શું વિચિત્રતા છે કે આપના ચરિત્રનો એ પ્રભાવ છે–૯૨–હે વામામાત ! પાર્શ્વજિન ! શું આપ સર્વથી ઉદાર ચરિત્રવાળા છો ! અથવા આપમાં અપૂર્વ અને પૂર્ણ દાનેશ્વરીપણું છે, અથવા શું સકલ જનના ચિત્તને હરણ કરનારૂં આપનું આ માહાત્મ્ય છે.

કે જેથી જીવોની વિવિધ પ્રકારની પ્રકૃતિ પણ આપને સર્વશ્રેષ્ઠ સ્વરૂપે સ્વીકારે છે–૯૩–હે પરમેશ્વર ! હે વિપુલ સુખશાતાના દાયક આપની ખ્યાતિની વાત શી કરવી ? આપના પ્રભાવથી બીજાઓને પણ કપટ રચના નડતી નથી, એટલે હે ભગવન્! એવો કોણ પ્રાણી છે કે જે વચનામૃત વડે જગતજીવોની આન્તર તૃષ્ણાને હરનારા, અને નિબિડ માયામૃષાને દળી નાંખનારા આપનો આશ્રય ન કરે–આપને શરણે ન રહે–અર્થાત્ સર્વ આપનું આશ્રયણ કરે છે–૯૪–હે પૂર્ણ ઇચ્છાવાળા અર્હન્! આપ કર્મસમૂહ રૂપ વિકટ વૈતાઢ્ય પર્વતમાં ઘડાએલ ગ્રન્થિરૂપ કપાટને સમ્યક્પરિણતિ દંડથી ભેદીને સકલ અસદાગ્રહરૂપ જળને ઉછળતા ઉલ્લાસથી પાર પામીને મ્લેચ્છસ્વરૂપ મિથ્યાત્વનો વિજય કરીને–ચક્રવર્તી વિજયવંત વર્તો છો–૯૫–હે જિન ! આપે—રમણીના પયોધર અને જઘનની સેવામાં આસક્ત એવા દેવો, મહાદંભ અને મહારંભવાળા સ્વભાવે પરચ્છિદ્રાન્વેષી ગુરુઓ, તથા વેદવિહિત ક્રિયાથી જ પુષ્ટ ઉન્નતિને માનનારો દયાહીન ધર્મ–એ પ્રમાણે વધેલું–મિથ્યાત્વ સત્સિદ્ધાન્તરૂપ ઘનથી ચૂરી નાંખ્યું–૯૬–હે દેવ ! આપ સિવાય અન્ય કોઇને પણ ક્ષણવાર પણ હું દેવરૂપે માનતો નથી આપે દર્શાવેલા અને ઇષ્ટ ગુરુ સિવાય બીજા માર્ગ ભ્રષ્ટ થયેલાને અહિં ગુરુરૂપે માનતો નથી. અને રાજસભામાં ચર્ચા ચાલે તો પણ અન્ય ધર્મને હું ચલાવી લેતો નથી. માટે આપ મારા પર ઉત્તરોત્તર ઉદય આપે એવી દયાને હે મહેશ્વર કરો–૯૭–હે ત્રિભુવન સુન્દર ! મહાવિદ્યાઓનું મૂળ કારણ અને સર્વદા અનુકૂળ એવું આપનું નામ જો સ્મરણમાં રહી જાય તો સર્વભય નાશ પામે, લક્ષ્મી દિન પ્રતિદિન વધતી રહે, રોગો શાન્ત થઇ જાય, શુભસંયોગથી સુખ મળે–૯૮–નમસ્કાર કરતાં દેવોના મુકુટના મણિઓની પ્રભાવના સમૂહથી લાલ થઇ છે ચરણના નખની કાંતિ જેની એવા, અનેક દોષ મુકત વચન

વડે પાપને ધોનારા એવા શુભવાળા ભગવન્ ! આપને નમસ્કાર હો–૯૯–હે પ્રભો ! આપની સુન્દર સ્તુતિ કરવાથી તત્કાળ મને કલ્પવૃક્ષ ફળ્યો, પાપ પુંજ ગળી ગયો, ને વળી રતના અવલેપને હરનાર ચિન્તામણી–સુરમણી હાથમાં રમે છે–૧૦૦–હે ઇશ ! આપની સમ્યક્ પ્રકારે કરેલી સ્તુતિ એ પરમ છે, મોક્ષલક્ષ્મીનું કામણ–આકર્ષણ કરે છે, અનુપમ પ્રિયનો સંયોગ કરાવનાર કારણ છે ઉત્કટ–સંકટને શાંત કરનાર છે ને તે જ વિજયવંત વર્તે છે–૧૦૧–હે ભગવન્ ! જો મેં આપનું શાસન પ્રાપ્ત કર્યું છે તો હવે મારે બીજું શું બાકી રહે છે ! હે આનન્દદાયક પરમેશ્વર ! ચિન્તામણિ હાથમાં આવ્યા પછી એવું કયું ધન છે કે જે વાંકુ રહે–ન મળે -અર્થાત્ મળે જ–૧૦૨–હે જિનેશ્વર ! આ વિશ્વમાં પ્રસરતા મદન રૂપ સર્પના ગર્વને ગાળી નાંખવા માટે મંત્રરૂપ, પ્રત્યક્ષ કલ્પવૃક્ષ, પરમશુભ નિધાન, ઉત્તમોત્તમ વિચારમય, અન્ધકારને નાશકરનારા, મોક્ષના આનંદના કંદ–પરિપુષ્ટ મૂળ, ત્રિભુવન સૂર્ય, પ્રભાવડે અજ્ઞાન અંધકાર હરનારા, સંસારને દૂર કરનારા રોગ મુકત એવા આપને વિષે મારી સમગ્ર પવિત્ર ભાવના હો–૧૦૩–હે ભગવન્ ! મારા પર શીઘ્ર પ્રસન્ન થાવ, મારા પાપને દૂર કરો, હે સ્વામિન્ ! મારા પુણ્યને પુષ્ટ કરો, હે દેવ ! આપના સિવાય અન્ય કોઇ મને યાદ આવતું નથી, આપ એક જ મારે સેવનીય છો–૧૦૪–હે નાથ ! આપનું નામ સ્મરણ કરનારા આત્માઓને સિંહ–હાથી–સર્પ–અગ્નિ –યુદ્ધ–સમુદ્ર–બન્ધન અને રોગથી થતાં ભય ઉત્પન્ન થતા નથી. -૧૦૫–હે ચિદાનન્દના નિસ્યન્દ ઝરણ, ! હે લોભરહિત ! હે શોભાથી સુન્દર ! ભગવન્ ! વન્દન કરતાં ઇન્દ્રનાં ચલાયમાન મસ્તક પર રહેલી કલ્પવૃક્ષની માળાના પરાગરજથી પીળચટા થયેલા નિર્મળ-યશવાળા આપના બન્ને ચરણોનું અમે સ્મરણ કરીએ છીએ.–૧૦૬–હે પ્રભો ! આપે અમૃત સમા સુન્દર વચનો વડે અનેક પ્રકારના

સંસારના તાપ સમૂહને આ લોકમાં શાંત કર્યો, અગણિત વિસ્તાર વાળા ગુણ રત્નના નિધાન એવા હે અર્હન્ ! તે કારણે હું આપના ચરણનું શરણ સ્વીકારું છું-૧૦૭-એ પ્રમાણે-વિસ્તાર પામેલા વિક્રમવાળા, ચરણમાં નમન કરતાં દેવોની શ્રેણીના મુકુટમાં રહેલા મણીરૂપ દર્પણમાં જેમનાં મુખચંદ્રનું પ્રતિબિમ્બ પડે છે એવા, પરમમંગલ સ્વરૂપ, વિશ્વજનને વાંછિત આપવામાં અદ્વિતીય કલ્પવૃક્ષ એવા વામાંગજ-પાર્શ્વનાથ યશોવિજય-સંપદાને વિસ્તારો-૧૦૮-"

આ સ્તોત્ર મૂળમાત્ર જૈનસ્તોત્ર સન્દોહ-પ્રથમ વિભાગમાં પૃષ્ઠ ૩૯૩ થી ૪૦૬ સુધીમાં મુદ્રિત થયેલું છે. તેમાં ૧ થી ૬, ૫૮ થી ૬૨, અને ૬૮ થી ૯૩ એટલા સૂક્તો નથી જે અહિં પૂર્તિ કરવામાં આવ્યા છે. આ સ્તોત્રમાં કાવ્યાનુસારિણી અનેક કલ્પનાનો આસ્વાદ છે અને રચનાનું શબ્દસૌષ્ઠવ વિચારતાં પૂજ્ય ઉપાધ્યાયજી મહારાજશ્રીની આ જીવનનાં પૂર્વાર્ધમાં રચાએલી કૃતિ છે એવું જણાય છે. આ સ્તોત્રનાં પ્રારંભના પદ્યો નથી મળ્યાં એટલે ચોક્કસ તે. ન કહેવાય છતાં આ સ્તોત્રની શરૂઆત 'ऐँ' પૂર્વક થઈ હોય એમ લાગતું નથી, તેમાં એક કારણ એ પણ ગણાવી શકાય એવું છે સ્તુતિશ્લોકમાં એક શ્લોક નીચે પ્રમાણે પ્રચલિત છે.

**नतानेकच्छेकत्रिदशमुकुटोद्दीप्तरमणि–**
**व्रजज्योतिर्ज्वालास्नपितचरणाम्भोजयुगलम् ।**
**घनश्यामं कामं भुवनजनहर्षप्रणयिनं,**
**स्तुवे पार्श्वं गोडीपुरिपरिसरत्प्रौढमहसम् ॥१॥**

આ શ્લોકની રચના આ સ્તોત્રની રચના સાથે સરખાવતાં એમ સ્પષ્ટ જણાય છે કે તે આ સ્તોત્રનો પ્રથમ શ્લોક છે અને

સ્તુતિમાં પ્રચલિત થવાને કારણે જળવાઈ રહ્યો છે. જો એ પ્રમાણે હોય તો 'ऐँ'થી આ સ્તોત્રનો આરંભ નથી એમ સ્પષ્ટ કહી શકાય. પૂ. ઉપાધ્યાયજી મહારાજશ્રીજીની અન્ય પણ આહ્લાદજનક અનેક કાવ્યકૃતિઓ છે તેમાંની કેટલીક મૂળમાત્ર પ્રકટ થયેલી છે તો કેટલીક પ્રકટ પણ નથી થઈ—તેને સારા સ્વરૂપમાં પ્રકાશિત કરવાની પરમ આવશ્યકતા છે.

મુદ્રણ થાય એ કરતાં પણ વિશેષ અગત્ય તો તેનું અધ્યયન–વાચન વધે તેની છે, કૃતિઓનું ચિરજીવન એ રીતે રહે છે. એ રીતે ચિરજીવન પ્રાપ્ત કરાવવા યોગ્ય આત્માઓ ઉદ્યત બને એજ અભિલાષા.

દે. શ્રી અમૃતસુરીશ્વરજી
જ્ઞાનમંદિર
દૌલતનગર–બોરીવલી (પૂર્વ)
મુંબઈ–૬૬

પં. ધુરંધરવિજય ગણી
તા. ૧–૨–૧૯૬૨

## પૂજ્યપાદ પંન્યાસ પ્રવર શ્રી પુણ્ય-વિજયજી ગણિવર્ય મહારાજશ્રીનાં જન્માદિ—

| | | |
|---|---|---|
| જન્મ સંવત્ | ૧૯૩૪ | માગ-શુદિ ૮ ગુરુવાર તા. ૧૩-૧૨-૧૮૭૭ |
| દીક્ષા સંવત્ | ૧૯૮૮ | માહશુદિ-૧૦ (જાવાલ |
| વડી દીક્ષા સંવત્ | ૧૯૮૮ | ફાગણશુદિ-૩ (બરલૂટ) |
| પંન્યાસ પદ સંવત્ | ૨૦૦૭ | વૈશાખશુદિ-૩ (અમદાવાદ- રાજનગર) |
| સ્વર્ગવાસ સંવત્ | ૨૦૧૯ | ભાદરવાશુદિ-૧૩ (દૌલતનગર- બોરીવલી) |



પૂજ્યપાદ પંન્યાસપ્રવરશ્રી પુણ્યવિજયજી ગણિવર્ય મહારાજ

# श्री पुण्याष्टकम्

सुविषयेऽप्यतुले सुकुलेऽमले, ऽजनि जनिर्जननीजनकप्रिया ।
वयसि यस्य पुरः परिपोषणं, विजयते स हि पुण्यगुरुर्मम ॥१॥

यदभिधा ननु पीतपुरस्सरा, परमतोऽम्बर इत्यनुदानतः ।
अधिगृहं विदिता परदेवता, विजयते स हि पुण्यगुरुर्मम ॥२॥

न पठितं लघु नाधिकृतं ततं, यदपि येन धृतं न महास्पदम् ।
तदपि सत्कृतिना सुकृतं कृतं, विजयते सहि पुण्यगुरुर्मम ॥३॥

गृहगतोऽपि गृहाद्विरतो रताद्, बहुधनोऽपि धनं तृणवज्जहौ ।
विपदि यो न चलोऽप्यमदः श्रियां, विजयते स हि पुण्यगुरुर्मम ॥४॥

उपकृतं स्वजने निजभावतः, परजनेऽपि दयार्द्रमनस्तया ।
जगति येन गतिः सुगतिर्धृता, विजयते स हि पुण्यगुरुर्मम ॥५॥

जिनवचो हृदि यस्य सदा दृढं, मुखमृतेन वचः स्वमृतेन युक् ।
सुतपसा विमलं पुनरङ्गकं, विजयते स हि पुण्यगुरुर्मम ॥६॥

प्रगुरुनेमिगुरोरनुशासना – दमृतगौरवमिद्धमुपासितम् ।
अधिगतो हृदि येन महोत्सवो, विजयते स हि पुण्यगुरुर्मम ॥७॥

स्वतनयं मुनिवर्त्मनि नीतवान्, व्रततर्तिं विरतिं च गृहीतवान् ।
गणिपदं वरपं–पदमाप्तवान्, विजयते स हि पुण्यगुरुर्मम ॥८॥

शरगजाब्दमिते ननु जीविते, त्रिदशवत्सरसंयमपालनात् ।
त्रिदशताऽधिगताऽभिमता ध्रुवं, विजयते स हि पुण्यगुरुर्मम ॥९॥

卐

❁ ओँ ह्रीँ अर्हँ नमः ❁

न्यायविशारद–न्यायाचार्य–वाचकप्रवरश्रीयशोविजयजिद्गणिवर्य–

विरचितं—

# श्रीगोडीपार्श्वनाथस्तोत्रम्

## ( भक्तिरसपूर्ण खण्डकाव्यम् )

( वृत्त्या समन्वितम् )

卐

[ नमोऽर्हँस्ते नित्यं परमहितसत्याय महसे,
नमो रूपातीताद्भुतविमलरूपाय महते ।
नमोऽनन्तस्तोत्राकलितवरगोत्राय गुणिने,
नमो गोडीपार्श्वप्रकटप्रभनाथेऽत्र भवते ॥ १ ॥ ]

वृत्तिः—

**अर्हद्रूपं हृदि ध्यात्वा, गोडीपार्श्वजिनस्तवम् ।**
**विवृणोमि यथाशक्ति, भक्तिर्व्यक्ताभवेद्यथा ॥१॥**

**अर्हन् !**—जिनेश्वरपार्श्वनाथ ! **परमहितसत्याय**—उत्कृष्टहितसत्यरूपाय । **महसे**—तेजोरूपाय । **ते**—भवते, भगवते पार्श्वनाथायेतियावत् । **नित्यं**—सदा । **नमः**—नमस्कारः, अस्त्विति शेषः । 'अर्हस्ते' इत्येतदग्रिमपादत्रयेऽप्यनुसञ्जनीयम् । **रूपातीताद्भुतविमलरूपाय**—नीरूपायापि चित्रकृन्निर्मलनिरञ्जनस्वरूपाय । **महते**—विशिष्टाय, **ते नमः**—नमस्कारः । **अनन्तस्तोत्राकलितवरगोत्राय**—अनन्तैरपरिमितैः स्तोत्रैः स्तवनैरप्यकलितम् असंख्यातं वरम् उत्कृष्टं गोत्रं नाम यस्य सः, तस्मै तथा । **गुणिने**—प्रशस्तगुणाय, ते **नमः** । **गोडीपार्श्वप्रकटपरनाम्ने**—गोडीपार्श्वेतिसुव्यक्तापराभिधानाय । **अत्रभवते**—पूज्याय, 'पूज्ये तत्रभवानत्रभवांश्च भगवानपि' २।२५० । इत्यभिधानचिन्तामणिः । ते, **नमः**—अस्त्विति शेषः ॥१॥

[ **कदाचित् कान्तारे विहितवसतिर्नाथ ! नियतं,**
**नितान्ताऽऽक्रान्तारेरसुरकमठादन्धतमसः ।**
**महाकष्टं प्राप्तः क्षणमपि न रोषं त्वमगमः,**
**क्षमाया ईशित्रे भवतु भवते किञ्चन नमः ॥२॥** ]

वृत्तिः—**नाथ !**—स्वामिन् !, भगवन् पार्श्वनाथ !, **कदाचित्**—कस्मिँश्चित् समये । **कान्तारे**—कानने । **विहितवसतिः**—कृतनिवासः, त्वमिति शेषः । **नितान्ताक्रान्तारेः**—अत्यन्तविरूपशत्रोः । **अन्धतमसः**—गाढान्धकाररूपात्, प्रबलमिथ्यात्वमोहमोहितादितियावत् । **असुरकमठात्**—कमठासुरसकाशात् । **महाकष्टम्**—अतिशयितं दुःखम् ।

**प्राप्तः**—अधिगतः, ( यत् ) । **क्षणम्**—सूक्ष्मकालविशेषम्, व्याप्तौ द्वितीया । **अपि**—खलु । **रोषम्**—क्रोधम् । **त्वम्, न**—नहि । **अगमः**—प्राप्तौः, ( तत् ) । **क्षमायाः**—तितिक्षायाः । **ईशित्रे**—स्वामिने । **भवते**—पार्श्वनाथाय । **किञ्चन**—किमपि । **नमः**—नमस्कारः । **भवतु**—जायताम् ॥२॥

[ समे त्वा संप्राप्ताश्चतुरधिकषष्टिः सुरवराः,
क्षणं ते सामीप्यं न च जहति कोटीदिविषदः ।
मदं पूर्णं तूर्णं निरवधिविलासं त्वमवधी-
र्महान्तोऽपेक्षन्ते नहि कृतिविधौ साधनविधीन् ॥३॥ ]

वृत्तिः—**चतुरधिकषष्टिः**—चतुःषष्टिसङ्ख्याकाः । **समे**—सर्वे । **सुरवराः**—देवेन्द्राः । **त्वा**—त्वाम्, श्रीमन्तं भगवन्तम्, पार्श्वप्रभुमिति यावत् । **संप्राप्ताः**—समधिगताः, समाश्रिता इति यावत् । **च**—पुनः । **कोटीदिविषदः**—कोटिसङ्ख्यकदेवाः । **क्षणम्**—क्षणमपीत्यर्थः । **ते**—भवतः पार्श्वनाथस्य । **सामीप्यम्**—पार्श्ववर्तिताम् । **न**—नहि । **जहति**—त्यजन्ति । **त्वम्**—भगवान् पार्श्वनाथः । **तूर्णम्**—झटिति । **निरवधिविलासम्**—असीमविलासकलितम् । अत एव **पूर्णम्**—परिपूर्णम् । **मदम्**—गर्वम्, 'मदो रेतसि कस्तूर्यां हर्षे गर्वेभदानयो'रिति मेदिनी । **अवधीः**—हतवान्, अथवा निरवधिविलासमित्येतद्धननक्रियाविशेषणम्, तथा च निरवधि-विलासं यथास्यात्तथा हतवानित्यर्थः । **हि**-निश्चयेन । **महान्तः**—महानुभावाः । **कृतिविधौ**—कार्य्यविधाने । **साधनविधीन्**—साधनसामग्रीप्रकारान् । **न**—नहि । **अपेक्षन्ते**—अपेक्षाविषयतामासादयन्ति । अर्थान्तरन्यासालङ्कारः ॥३॥

[ विचित्रां त्वं मायां मनुजभुवि निर्माय भगवन् !
अयासीर्मायायाः कथमपि वशं क्वापि नतराम् ।
अनादिः सम्बन्धो व्रजति न विनाशं क्वचिदिति,
श्रुतं शश्वन्मिथ्याकृततरममायेन भवता ॥४॥ ]

वृत्तिः—भगवन्—षड्विधैश्वर्यशालिन् तत्र भगवन् पार्श्वनाथ ! त्वम्—पार्श्वनाथस्त्वम् । मनुजभुवि—मनुष्यलोके । विचित्राम्—नानाविधाश्चर्यजननीम् । मायाम्—कृपाम् लीलामिति यावत्, 'स्यान्माया शाम्बरी कृपा दम्भो बुद्धिश्चे' त्यनेकार्थसंग्रहः । निर्माय—रचयित्वा । क्वापि—कुत्रापि । कथमपि—केनापि प्रकारेण । मायायाः—निकृतेः । वशम्—अधीनताम् 'वशो जनस्पृहायत्तेष्वायत्तत्वप्रभुत्वयोः' इत्यनेकार्थः । नतराम्—नैव खलु । अयासीः—अगमः, प्राप्नोरितियावत् । अमायेन—मायारहितेन । भवता—तत्रभवता पार्श्वनाथेन । अनादिः—आद्यवयवविरहितः । सम्बन्धः—संसर्गः । क्वचित्—कुत्रापि स्थाने काले च । विनाशम्—विध्वंसम् । न—नैव । व्रजति—गच्छति । इति—इत्थम् । श्रुतम्—प्रसिद्धम्, वस्त्विवतिशेषः । शश्वत्—भूयोभूयः । मिथ्याकृततरम्—अत्यन्तं मिथ्याकृतम्, अनादिसहचरीं मायामपाकृत्य भवताऽनादिः सम्बन्धोऽपि विघटयितुं शक्य इति प्रकटीकृतम् इति ॥४॥

[ विलासानां त्वत्तः प्रमदभरलास्यं व्यपगतं,
कषायाणां कायस्तव नहि सहायः समजनि ।
त्वया प्राप्ता मुक्तिर्विरहरहितानुत्तमहिता,
प्रभो ! ते वैलक्ष्यं भवति न हि लक्ष्यं क्षणमपि ॥५॥ ]

वृत्तिः—**प्रभो !**—पार्श्वनाथजिनेश्वर ! **त्वत्तः**-भवतः सकाशात् । **विलासानाम्**—कामादिविभ्रमाणाम् । **प्रमदभरलास्यम्**—प्रमोदातिशयकृतनृत्यम् । **व्यपगतम्**—व्यवच्छिन्नम् । **कषायाणाम्**—क्रोधमानमायालोभत्वेन प्रसिद्धानाम् । **कायः**—सङ्घः,समुदय इतियावत्, 'कायः कदैवते मूर्तौ सङ्घे लक्ष्मस्वभावयोः'इत्यनेकार्थः। **तव**—भवतः । **सहायः**—सहायकः,उपकारक इति यावत्,कस्मिँश्चिदपि कार्ये इति शेषः । **नहि**-नैव। **ममजनि**—अभूत् , न च किमपि स्वात्मकार्यं भवता कषायं पुरस्कृत्य साधितमितिभावः । **त्वया**—भवता । **विरहरहिता**—अवियोगिनी । **अनुत्तरहिता**—नास्त्युत्तरमुत्कृष्टं यतस्तदनुत्तरं तादृशं हितं यतः सा तथा, 'उत्तरं प्रवरोर्ध्वयोः' इत्यनेकार्थः । अथवाऽनुत्तरविमानवासिनाममराणामाशुमोक्षगामित्वात्तथा ! **मुक्तिः**—परमनिर्वृत्तिः, निर्लोभताऽपि—क्रमप्राप्ताऽवसेया तन्त्रेण । **प्राप्ता**—अधिगता । **ते**—श्रीमतो भवतः । **वैलक्ष्यम्**-वैचित्र्यम् । **क्षणमपि**—किञ्चित्कालमभिव्याप्यापि । **लक्ष्यम्**—दृश्यं विज्ञेयं वा । **नहि**—नैव भवति, जायते ॥५॥

**[ पुरा स्वान्तं शान्तं न भवदभितस्तान्तमभवद्,**
**भवत्सत्कं कान्तं वदनमधुनाऽकान्तसदनम् ।**
**मया दर्शं दर्शं स्मररिपुसुताङ्केन मुदिरं,**
**यथा नर्तं नर्तं विरचितमतान्त्या मुदितम् ॥६॥ ]**

वृत्तिः—**पुरा**—पूर्वम् । **शान्तं न भवत्**—अशान्ततया विद्यमानम् । **स्वान्तम्**—मानसम्, ममेतिशेषः । 'स्वान्तं हृन्मानसं मनः' इत्यमरः । **अभितः**—समन्तात् । **तान्तम्**—क्लान्तम्, अभवत् । **अधुना**—इदानीम् । **अकान्तसदनम्**—कं सुखं न कम् अकं दुःखम्, तस्य अन्तो नाशो यत्र

तादृशं सद्नं भवनं, तद्रूपमिति, सर्वाधिव्याधिशमनमिति यावत्, 'कं शीर्षेऽम्सु सुखे' 'अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयो' रित्युभयत्राप्यनेकार्थः । **भवत्सत्कम्**—भवदीयम् । **कान्तम्**—कमनीयम् । **वदनम्**—आननम् । **मया**—मल्लक्षणेन । **स्मररिपुसुताङ्केन**—मयूरेण, स्मररिपोः शिवस्य सुतः पुत्रः कार्तिकेयस्तस्याङ्को लाञ्छनं मयूरस्तेन तथा । **मुदिरम्**—घनम्, मेघमिति भावत्, 'घनजीमूतमुदिर' इत्यमरः । **यथा**—इव । **दर्शं दर्शम्**—आलोक्यालोक्य । **च**—पुनः । **नर्तं नर्तम्**—नर्तित्वा नर्तित्वा । **अतान्तम्**—अक्लान्तम् । **विरचितम्**—कृतम्, सत् । **मुदितम्**—प्रसन्नम् । **अभवत्**—समजायत, प्रथमचरणस्थमभव-दित्यस्यात्राप्यन्वयो विधेयः ॥६॥

**स्मरः स्मारं स्मारं भवदवथुमुच्चैर्भवरिपोः,**
**पुरस्ते चेदास्ते तदपि लभते तां बत दशाम् ।**
**रिपुर्वा मित्रं वा द्वयमपि समं हन्त ! सुकृतो-**
**ज्झितानां किं ब्रूमो जगति गतिरेषाऽस्ति विदिता ॥७॥**

वृत्तिः—**स्मरः**—कामः । **उच्चैः**—अत्यधिकम् । **भवदवथुम्**—स्मराराातिजनितोपतापम् । **स्मारं स्मारम्**—वारंवारं स्मृत्वा । **भवरिपोः**—संसारशत्रोः, श्लेषमहिम्ना मदनारातिरिपोः, 'भवः सत्ताप्तिजन्मसु, रुद्रे श्रेयसि संसारे' इत्यनेकार्थः । **ते**—भवतः, तीर्थकृतः पार्श्वनाथ-स्येतियावत् । **पुरः**—अग्रे । **चेत्**—यदि । **आस्ते**—उपविशति, आयातीति यावत् । **तदपि**—तथापि । **बत**—आश्चर्यम् । **ताम्**—प्रसिद्धाम्, भस्मीभवनात्मिकाम् । **दशाम्**—अवस्थाम् । **लभते**—प्राप्नोति, निज-शत्रुशत्रोर्मित्रत्वेन सम्भावितस्य ते समीपं गत्वाऽपि तामेव दशामवाप्नो-

तीति महदाश्चर्यमेतत् । हन्त–खेदे । रिपुः–शत्रुः । वा–विकल्पे । मित्रम्–सखा । वा–विकल्पे । द्वयमपि–द्वितयं खलु । समम्–समानम् । किं ब्रूमः–किं कथयामः । सुकृतोज्झितानाम्–पुण्यविरहितानाम्, हतभाग्यानामिति यावत्, जनानामिति शेषः । जगति–लोके । एषा–इयम् । गतिः–मार्गः, पद्धतिरितियावत् । विदिता–प्रसिद्धा । अस्ति–वर्तते, विकस्वरालङ्कारः, 'यस्मिन् विशेषसामान्यविशेषाः स विकस्वरः' इति तल्लक्षणात् ।७॥

दृशां प्रान्तैः कान्तैर्नहि वितनुषे स्नेहघटनां,
प्रसिद्धस्ते हस्ते न खलु कलितोऽनुग्रहविधिः ।
भवान् दाता चिन्तामणिरिव समाराधनकृता-
मिदं मत्वा सत्वा दधति तव धर्मे दृढरतिम् ॥८॥

वृत्तिः–दृशाम्–नेत्राणाम्, अवलोकनानामितियावत् । कान्तैः–मनोरमैः । प्रान्तैः–पर्यन्तभागैः, कृत्वा । स्नेहघटनाम्–अनुरागपरम्पराम् । नहि–नैव । वितनुषे–विस्तारयसि, रागपूर्णकटाक्षावलोकनं न कुरुष इति भावः । ते–भवतः । हस्ते–करकमले । कलितः-ललितः । अनुग्रहविधिः–अनुकम्पाप्रकारः । न–नहि । प्रसिद्धः–ख्यातः । खलु–ध्रुवः, कराभिनयं नाटयित्वा नाशीर्वादविधिं विदधासि त्वमिति भावः । भवान्–अत्रभवान् पार्श्वनाथः । चिन्तामणिः–चिन्तितवस्तुदायकचिन्तारत्नम् । इव–यथा । समाराधनकृताम्–सम्यक्सेवातत्पराणाम् । सम्बन्धे षष्ठी । दाता–वितरणशीलः । सत्त्वाः–प्राणिनः, ( तव–भवतः ) । इदम्–समाराधकाभीष्टदानम् । मत्वा–अवबुध्य । तव–भवतः । धर्मे–शासने । दृढरतिम्–गाढानुरागम् । दधति–धारयन्ति ( उपमा )॥८॥

स सेवाहेवाकैः श्रित इह परैर्यः शुभकृते,
नियन्ता हन्ताऽयं सजति गृहिणीं गाढमुरसा ।
भवेदस्मात् कस्मात् फलमनुचितारम्भरभसा-
ल्लतावृद्धिर्न स्याद् दवदहनतो जातु जगति ॥९॥

वृत्तिः—**नियन्ता**—नियमनकर्ता सन्। **यः**—बुद्धिविषयीभूतः। **अयम्**-परैरुपास्यमानो देवतया प्रसिद्धः। **गृहिणीम्**—भार्य्याम्। **उरसा**—वक्षःस्थलेन। **गाढम्**—निविडं यथा स्यात्तथा, मोहवशादिति शेषः। **सजति**—समालिङ्गति। **हन्त !**—खेदार्थकमव्ययम्। **इह**—लोकेऽस्मिन्। **सेवाहेवाकैः**—शुश्रूषाग्रहशीलैः। **परैः**—अन्यतीर्थिकैः। **सः**—मोहप्रयोज्यवक्षःस्थलकरणकगृहिणीकर्मकालिङ्गनकर्ता देवः। **शुभकृते**—सुकृतार्थम्। **श्रितः**—सेवितः। **अनुचितारम्भरभसात्**—अयोग्यकार्यसमासक्तात्। **अस्मात्**—तथाभूताद्देवात्। **फलम्**—सेवाजनितमोक्षादिफलम्। **कस्मात्**—कुतः। **भवेत्**—जायेत, निदर्शयति, लतावृद्धिरित्यादि। **जगति**—संसारे। **जातु**—कदाचित्। **दवदहनतः**—दावानलतः। **लतावृद्धिः**—वल्लरीसमृद्धिः। **न**—नहि। **स्यात्**—भवेत्। 'वाक्यर्थयोः सदृशयो-रैक्यारोपो निदर्शने'ति चन्द्रालोकोक्तलक्षणोऽत्र निदर्शनालङ्कारः ॥९॥

प्रदीपं विद्यानां प्रशमभवनं कर्मलवनं,
महामोहद्रोहप्रसरदवदाहेन विदितम् ।
स्फुटानेकोद्देशं शुचिपदनिवेशं जिन ! तवो-
पदेशं निःक्लेशं जगदधिप ! सेवे शिवकृते ॥१०॥

वृत्तिः—**जगदधिप !**—अयि विश्वपरमेश्वर ! **जिन !**—भगवन् अर्हन् ! **विद्यानाम्**—ज्ञानानाम्। **प्रदीपम्**—प्रकाशकत्वात् प्रदीप-

रूपम् । **प्रशमभवनम्**—शान्तभावस्य सदनम्, शान्तिनिशान्तमिति-यावत् । **कर्मलवनम्**—ज्ञानावरणप्रमुखकर्मोन्मूलनरूपम् । **महामोहद्रोह-प्रसरदवदाहेन**—महान्तौ यौ मोहद्रोहौ रागद्वेषौ तयोः प्रसरः प्रसारः स एव दवो वनम् तस्य दाहेन दाहकत्वेन । **विदितम्**—प्रसिद्धम् । **स्फुटानेकोद्देशम्**—स्फुटाः प्रकटाः अनेके बहवः उद्देशा अध्ययनविभागात्मका शास्त्रभागा यत्र तं तथा । **शुचिपदनिवेशम्**—पवित्रपदावलिविन्यासम् । **निःक्लेशम्**—क्लेशरहितम् । **तव**—भवतः । **उपदेशम्**—देशनावचनम् । **शिवकृते**—मोक्षार्थम् । **सेवे**—श्रयामि, रूपकम् ॥१०॥

अगण्यैः पुण्यैश्चेत्तवचरणपङ्केरुहरजः,
शुचिश्लोका लोका शिरसि रसिका देव ! दधते ।
तदा पृष्ठाकृष्टा धृतधृतिरमीषां कृतधिया-
मविश्रान्त कान्तं त्यजति न निशान्तं जलधिजा ॥११॥

वृत्तिः—**देव !**—देवाधिदेव ! **शुचिश्लोकाः**—विशुद्धयशसः, 'श्लोकस्तु पद्यबन्धे यशस्यपि' इत्यनेकार्थः । **रसिकाः**—रसविदः, सहृदयहृदयवेद्यरसानुभवभावितान्तःकरणाः । **लोकाः**—जनाः । **चेत्**—यदि । **अगण्यैः**—अगणनीयैः, असङ्ख्यैरितियावत् । **पुण्यैः**—सद्भागधेयैः । **तव**—भवतः । **चरणपङ्केरुहरजः**-चरणकमलधूलिम् ,पादपद्मपरागमितियावत् । **शिरसि**—मस्तके । **दधते**—धारयन्ति । **तदा**—तर्हि, **पृष्ठाकृष्टा**—पृष्ठेन पृष्ठदेशेन तदवच्छेदेन वा **आकृष्टा**—आकर्षणमापादिता । **धृतधृतिः**—धृता धृतिर्धैर्य्यं यया सा तथा, स्थिरेतियावत् । **जलधिजा**—लक्ष्मीः, 'लक्ष्मीः पद्मा रमा या मा ता सा श्रीः कमलेन्दिरा । हरिप्रिया पद्मवासा, क्षीरोदतनयाऽपि च' इत्यभिधानचिन्तामणिः । **कृतधियाम्**—विदुषाम् ।

**अमीषाम्**–एषाम् । **कान्तम्**–मनोरमम् । **निशान्तम्**–गृहम्, 'गेहं तु गृहं वेश्म ········· धामागारं निशान्तं च' इत्यभिधानचिन्तामणिः । **अविश्रान्तम्**–निरन्तरम् । **न**–नहि । **त्यजति**–जहाति, लक्ष्मीस्तेषां सदनं कदाचिदपि नो विजहातीति भावः ॥११॥

**उदारं यस्तारं तव समुदयत्पूषविलस-**
**न्मयूखे प्रत्यूषे जिनप ! जपति स्तोत्रमनिशम् ।**
**प्रसर्पद्दानाम्भःसुभगकरटानां करटिनां,**
**घटा तस्य द्वारि स्फुरति सुभटानामपि न किम् ॥१२॥**

वृत्तिः—**जिनप !**–जिनेश्वर !, **यः**–बुद्धिविषयीभूतः । **समुदयत्पूषविलसन्मयूखे**–समुदयत उदयं लभमानस्य पूष्णः सूर्यस्य विलसन्तः शोभमाना मयूखाः किरणानि यस्मिन् तस्मिन् । **प्रत्यूषे**–प्रभाते । **तव**–भवतः । **उदारम्**–महत् । **स्तोत्रम्**–स्तवम् । **अनिशम्**–सततम् । **तारम्**–उच्चैर्यथास्यात्तथा । **जपति**–पठति । **तस्य**–बुद्धिविषयीभूतस्य, तादृशजापकर्तुरिति यावत् । **द्वारि**–द्वारदेशे । **प्रसर्पद्दानाम्भः-सुभगकरटानाम्**–प्रसर्पता प्रसरणशीलेन दानाम्भसा मदजलेन सुभगः सुन्दरः करटः कपोलप्रदेशो येषां तेषां तथा । **करटिनाम्**–दन्तिनाम् । **अपि**–पुनः, समुच्चये, 'अपि सम्भावनाशङ्कागर्हणासु समुच्चये । प्रश्ने युक्तपदार्थेषु, कामचारक्रियासु च' ॥४८॥ इत्यनेकार्थः । **सुभटानाम्**–वीरवराणाम्, प्रसर्पदित्याद्यत्राप्यन्वेयं तथा च प्रसर्पता दानाम्भसा वितरणवारिणा सुभगः करटो हस्तदेशो निन्द्यजीवनं वा येषां तेषाम् युद्धादिव्यवसायकरणादेतेषां जीवनं निन्द्यमिति । **घटा**–परम्परा, पङ्क्तिरिति यावत् । **न**–नहि । **स्फुरति**–विलसति । **किम्**–किमु,

अपि तु स्फुरत्येवेति भावः। तादृशकरटिसुभटश्रेणिकर्तृकद्वाराधिकरणकस्फुरणेन तदीयस्तोत्रजापकस्य राजत्वमुदात्तसम्पत्तिशालित्वं वा व्यज्यते, तादृशं च व्यङ्ग्यं श्रीपार्श्वनाथविषयककविगतरत्याख्यभावमुपस्करोति, एवञ्च भावध्वनिकाव्यमिदम् ॥१२॥

महालोभक्षोभव्यसनरसिकं चेतसि यदि,
स्फुरेद् वारंवारं कृतभवनिकारं त्वदभिधम् ।
तमोह्रासादासादिततत्तविकासाय मुनये,
तदा मायाकाया न खलु निखिला द्रुह्यति निशा ॥१३॥

वृत्तिः—यदि—चेत् । चेतसि—अन्तःकरणे, मुनेरिति शेषः। महालोभक्षोभव्यसनरसिकम्—महान्तौ यौ लोभक्षोभौ तयोर्व्यसने विशेषेण दूरीकरणे रसिकं साभिनिवेशम्, यद्वा महालोभक्षोभयोर्व्यसने-अनिष्टफलकरणे रसिकम्, 'व्यसनं निष्फलोद्यमे, दैवानिष्टफले सक्तौ स्त्रीपानमृगयादिषु' इत्यनेकार्थः। कृतभवनिकारम्—कृतो विहितो भवस्य संसारस्य निकारो दूरीकरणात्मकतिरस्कारो येन तत्तथा। त्वदभिधम्—तव भवतोऽभिधा नाम यस्मिँस्तत्तथा, भवन्नामसंवलितमित्यर्थः, पूर्वश्लोकतः स्तोत्रमितिपदमनुवर्तनीयम्, एवञ्च पूर्वोक्तविशेषणविशिष्टं भवदीयं स्तोत्रम्। वारंवारम्—मुहुर्मुहुः। स्फुरेत्—विलसेत्। तदा—तर्हि। तमोह्रासात्—अज्ञानविनाशात्। आसादिततत्तविकासाय—आसादितः प्राप्तः ततो विस्तृतो विकासः प्रकाश उन्नतिर्वा येन स तस्मै तथा। मुनये—श्रमणाय. मायाकाया—माया अविद्या निकृतिर्वा कायः स्वरूपं शरीरं वा यस्याः सा तथा। निखिला—समस्ता। निशा—सर्वसद्भूतार्थनिरोधापकतया मोहदृष्टिर्मिथ्यादृष्टिश्च। न खलु—नैव।

द्रुह्यति—द्वेष्टि, तापयतीति यावत्. 'कुद्द्रुहेर्ष्याऽसूयार्थानां यं प्रतिकोपः' ।२।२।२७। इति चतुर्थी ॥१३॥

स्थलीषु प्रभ्रष्टान् शिवपथपथः सङ्घभविनो,
विना त्वामन्यः कः पथि नयति दीपानुकृतिभिः ।
प्रभावादुद्भूतस्तव सुचरितः कीर्तिनिकरः,
करोत्यच्छं स्वेच्छं कलिमलिनमह्नाय भुवनम् ॥१४॥

वृत्तिः—शिवपथपथः—शिवपथस्य मोक्षमार्गस्य पन्थाः पद्धति । शिवपथपन्थास्तस्मात्तथा । स्थलीषु—अकृत्रिमभूमिषु, कुमार्गेषु इति यावत् । प्रभ्रष्टान्—च्युतान्, प्रस्खलितान् । सङ्घभविनः—सङ्घे चतुर्विध-सङ्घे स्थिता भविनो भव्यात्मानः सङ्घभविनस्तान् तथा । त्वाम्—भवन्तम्, पार्श्वनाथमितियावत् । विना—अन्तरेण । अन्यः—अपरः, भवदतिरिक्तः । कः—को नाम । दीपानुकृतिभिः—दीपकानुकरणशीलप्रकाशकवस्तुभिः । पथि—सुमार्गे । नयति—प्रापयति । तव—भवतः । प्रभावात्—अनुभावात् । उद्भूतः—समुत्पन्नः । सुचरितः—सुष्ठु चरितं प्रयोजकं यस्य स तथा । कीर्तिनिकरः—यशःसमुदयः । कलिमलिनम्—कलिकालमलीमसम् । भुवनम्—जगत् । स्वेच्छम्—यथेच्छम् । अह्नाय—झटिति । अच्छम्—स्वच्छम् । करोति—विदधाति । ( अर्थापत्तिरलङ्कार ) ॥१४॥

विलोलैः कल्लोलैर्जवनपवनैर्दुर्दिनशता—
हतोद्योतैः पोतैर्निकटविकटोद्यज्जलचरैः ।
जनानां भीतानां त्वयि परिणता भक्तिरवना,
जगद्बन्धो! सिन्धोर्नयति विलयं कष्टमखिलम् ॥१५॥

वृत्तिः—जगद्बन्धो !—जगतां बन्धुरुपकारकत्वात् मित्रं, तदामन्त्रणे तथा। विलोलैः—चञ्चलैः। कल्लोलैः—तरङ्गैः। जवनपवनैः—वेगवन्मारुतैः। दुर्दिनशताहृतोद्योतैः—अनेकदिवसव्यापकमेघाच्छन्नदिवसैः आहृत आसमन्तात् हृतो दूरीकृतः उद्योतः प्रकाशो येभ्यस्तैस्तथा। निकटविकटोद्यज्जलचरैः—निकटे समीपे विकटा भयङ्करा उद्यन्तः ऊर्ध्वमागच्छन्तः जलचराः नक्रादिजलजन्तवो येषां, तैस्तथा। पोतैः—प्रवहणैः, कृत्वेतिशेषः। भीतानाम्—भयवताम्। जनानाम्—लोकानाम् सांयात्रिकाणामिति यावत्। अवना—अवति, रक्षतीति तथा, संरक्षिका। परिणता—परिपाकं गता, पुष्टेति यावत्। त्वयि—भगवति, पार्श्वनाथे। भक्तिः—अनुरागः। सिन्धोः—समुद्रस्य सम्बन्धि। अखिलम्—समस्तम्। कष्टम्—दुःखम्। विलयम्—विनाशम्। नयति—प्रापयति। त्वमेव भक्तानां परिपालक इति भावः ॥१५॥

**अटव्यामेकाकी नतनिखिलनाकीश ! पतितो,**
**वृतायां कीनाशैरयि (रिव) हरिकरिव्याघ्रनिकरैः।**
**जनस्तत् पूतात्मा भवन इव भीतिं न लभते,**
**मनश्चेत् त्वन्नामस्मरणकरणोत्कं वितनुते ॥१६॥**

वृत्तिः—अयि नतनिखिलनाकीश !—प्रणतसकलसुरेन्द्र ! पार्श्वप्रभो ! 'देवाः सुपर्वसुरनिर्जरदेवतर्भु—बर्हिर्मुखानिमिषदैवतनाकिलेखाः' इत्यभिधानचिन्तामणिः। कीनाशैः—यमैः। इव—अयि स्थाने इवेतिपाठप्रकल्पने तु यथा यमतुल्यैरितियावत्, यथावस्थितपाठे तु क्षुद्रैरित्यर्थो विधेयः, घातिभिरिति वा, 'कीनाशः क्षुद्रयमयोः कर्षकोपांशुघातिनोः' इत्यनेकार्थः। हरिकरिव्याघ्रनिकरैः—सिंहेभशार्दूलसमूहैः।

**वृतायाम्**—व्याप्तायाम्। **अटव्याम्**—कान्तारे, 'अरण्यमटवीसत्रं, वार्क्षं च गहनं झषः, कान्तारं विपिनं कक्षः स्यात् षण्डं काननं वनम्, दवो-दावः' इत्यभिधानचिन्तामणिः। **एकाकी**—केवलः,असहाय इतियावत्। **पतितः**—निपतितः। **पूतात्मा**—श्रद्धालुतया पवित्रात्मा। **जनः**—नरः। **चेत्**—यदि। **मनः**—स्त्रं स्वान्तम्। **त्वन्नामस्मरणकरणोत्कम्**—भवदभि-धानस्मृतिसम्पादनतत्परम्। **वितनुते**—विधत्ते। **तत्**—तर्हि। **भवन इव**-गृहे यथा, स्वसदनवदितियावत्। **भीतिम्**—भयम्। **न**—नैव। **लभते**—अधिगच्छति, भवदीयनामस्मरणसज्जो जन एकाक्यपि श्वापदाकुलम-रण्यमविघ्नमुत्तरतीतिभावः ॥१६॥

**जपन्तस्त्वन्नाम प्रतिदशमि मन्त्राक्षरमयं,**
**दशानामाशानां श्रियमुपलभन्ते कृतधियः।**
**दशाऽप्याचाम्लैस्तु त्रिदशतरवः सन्निदधते,**
**कृतैः किं वा न स्याद् दशनिरयवासार्तिविलयः ॥१७॥**

वृत्तिः—**प्रतिदशमि**—प्रत्येकदशमीतिथौ, मासमात्रस्य बहुल-दशम्याम्, विशेषेण पौषकृष्णदशमीवासरे, तस्य भगवतः पार्श्वप्रभोः जन्मकल्याणकेन विशिष्टत्वात्। **मन्त्राक्षरमयम्**—मन्त्रस्वरूपम्, ओं ह्रीँ प्रमुखतत्तद्बीजाक्षरसंवलितत्वात् 'पार्श्वेति नाम्नोऽपि सिद्धमन्त्रत्वेनानु-भूतत्वाच्च। **त्वन्नाम**—'पार्श्वे'ति भवदीयमभिधानम्। **जपन्तः**—जपमानाः द्विसहस्रवारं जापं कुर्वाणाः। **कृतधियः**-सुधियः, सुज्ञा विज्ञा इति यावत्, जना इति शेषः। **दशानाम्**—दशसंख्याकानाम्। **आशानाम्**—दिशाम्। **श्रियम्**—लक्ष्मीम्। **उपलभन्ते**—प्राप्नुवन्ति। **तु**—पुनः। **आचाम्लैः**—'आयंबिले'ति प्रसिद्धव्रतैः। **कृतैः**—विहितैः विधिवदाचा—

म्लतपःपूर्वकं दशमीतिथिसमाराधनकरणादितिभावः। दश–दशमिताः। त्रिदशतरवः–कल्पवृक्षाः ते च दशविधा मत्ताङ्ग–भृङ्ग–त्रुटिताङ्ग–ज्योतिरङ्ग–दीपाङ्ग–चित्राङ्ग – चित्ररस – मण्यङ्ग – गेहाकारानियताङ्गनामानः, ते हि क्रमशः पान-भाजन–प्रेक्षणक–सूर्योद्योत–दीपोद्योत–कुसुम–भोजन–भूषण–सदन–वसना–सनाभिलाषान् परिपूरयन्ति, तदुक्तं लघुक्षेत्रसमासप्रकरणे 'तेसि मत्तंगभिंगा, तुडिअंगा जोई दीव चित्तंगा। चित्तरसा मणिअंगा, गेहागारा अणिअक्खा ॥९६॥ पाणं भायण पिच्छण रविपह दीवपह कुसुममाहारो। भूसण गिह वत्थासण, कप्पदुमा दसविहा दिंति ॥९७॥ इति. सन्निदधते–सन्निधानं विदधति। वा–पुनः। दशनिरयवासार्तिविलयः–शीतोष्णक्षुधापिपासाकण्डूपारवश्यज्वरदाहभयशोकाभिधानां दशविधानां नरकावासपीडानामन्तः, यदुक्तं बृहत्संग्रहणीप्रकरणे 'नरया दसविह वेयण, सीऊसिणखुहपिवासकंडूहिं, परवस्सं जरदाहं, भयसोगं चेव वेयंति ॥२०५॥, न–नहि। स्यात्–भवेत्। किमु–संभावनायाम् काक्वा भवेदेवेतिभावः ॥१७॥

स्रजं भक्त्या जन्तुर्घनसुमनसां सौरभमयीं,
न यः कण्ठे धत्ते तव भवभयार्तिक्षयकृतः।
कथं प्रेत्याभ्येत्य त्रिदशतरुपुष्पस्रजमहो,
शुभायत्तां धत्तां त्रिदशतरुणी तस्य हृदये ॥१८॥

वृत्ति—यः–बुद्धिविषयः। जन्तुः–जनः। भवभयार्तिक्षयकृतः–भवभयजनिता या अर्तिः पीडा तस्याः क्षयं विनाशं करोतीति तत्कृत्, तस्य तथा, संसारसाध्वसविलयविधातुरितियावत्। तव–भवतः, पार्श्वप्रभोरितियावत्। कण्ठे–ग्रीवायाम्। घनसुमनसाम्-घनाः सान्द्राश्च ताः

सुमनसः कुसुमानि घनसुमनसस्तासां तथा, प्रत्यग्रसौरभरसभरभरितपुष्पाणामितियावत्, 'प्रसूनं कुसुमं सुमं, पुष्पं सूनं सुमनसः, प्रसवश्च मणीवक' मित्यभिधानचिन्तामणिः । सौरभमयीम्–गन्धिलाम् । स्रजम्–माल्यम् । न–नहि । धत्ते–धारयति, परिधापयतीतियावत् । अहो–वितर्केऽव्ययम् । प्रेत्य–भवान्तरे 'प्रेत्यामुत्रभवान्तरे' इत्यभिधानचिन्तामणिः । अभ्येत्य–समीपं समागत्य । त्रिदशतरुणी–देवाङ्गना । तस्य–तादृशस्य, मालाऽपरिधापकस्येतियावत् । हृदये–हृद्देशे, वक्षसीतियावत् । शुभायत्ताम्–शुभं कल्याणमायत्तमधीनं यस्याः सा तां तथा, शुभकरीमितियावत् । त्रिदशतरुपुष्पस्रजम्–त्रिदशतरूणां मन्दारमुखसुरतरूणां सम्बन्धिनां पुष्पाणां स्रजम् मालाम् । कथम्–केन–प्रकारेण । धत्ताम्–धारयतु, परिधापयत्वितियावत्, अपि तु नैव परिधापयेदितिभावः ॥१८॥

पिता त्वं बन्धुस्त्वं त्वमिह नयनं त्वं मम गति–
स्त्वमेवासि त्राता त्वमसि च नियन्ता नतनृपः ।
भजे नान्यं त्वत्तो जगति भगवन् ! दैवतधिया,
दयस्वातः प्रीतः प्रतिदिनमनन्तस्तुतिसृजम् ॥१९॥

वृत्तिः—भगवन् !–षड्भिरैश्वर्यशालिन् पार्श्वनाथजिनेश्वर ! इह–अस्मिन् लोके । त्वम्–भवान् । मम–मल्लक्षणस्य जनस्य । पिता–जनकः । त्वम्, बन्धुः–बान्धवः । त्वम्, नयनम्–नेत्रम् । त्वम्, गतिः–शरणम्, 'सर्वं वाक्यं सावधारणं भवती'ति न्यायात् पूर्वत्र सर्वत्र त्वमित्यत्र त्वमेवेत्यवसेयम् । त्वमेव, त्राता–परिपालकः । असि–भवसि । नतनृपः–नताः प्रणताः नृपा राजानो यं स तथा ।

त्वम्, च–पुनः । नियन्ता–नियामकः । असि, जगति–संसारे । त्वत्तः–भवतः । अन्यम्–इतरम् । दैवतधिया–देवबुद्धया । न–नहि । भजे–सेवे । अतः–अस्माद्धेतोः । प्रीतः–प्रसन्नः, सन् । प्रतिदिनम्–प्रत्यहम् । अनन्तस्तुतिसृजम्–अनन्तां स्तुतिं सृजति रचयतीत्यनन्तस्तुतिसृक् तं तथा । दयस्व–अनुगृहाण, मामिति शेषः ॥१६॥

जगज्जैत्रैश्चित्रैस्तवगुणगणैर्यो निजमनः,
स्थिरीकृत्याकृत्याद् भृशमुपरतो ध्यायति यतिः ।
इहाप्यस्योदेति प्रशमलसदन्तःकरणिका,
समप्रेमस्थेमप्रसरजयिनी मोक्षकणिका ॥२०॥

वृत्तिः—यः–बुद्धिविषयीभूतः । यतिः–श्रमणः । चित्रैः–आश्चर्यकारकैः । जगज्जैत्रैः–भुवनविजयिभिः । तव–भवतः । गुणगणैः–ज्ञानप्रमुखगुणसमूहैः । निजमनः–स्वं चेतः । स्थिरीकृत्य–निश्चलं सम्पाद्य । अकृत्यात्–अकरणीयाद् विषयतः । भृशम्–अत्यन्तम् । उपरतः–विरतः, निवृत्त इतियावत् । ध्यायति–चिन्तयति, त्वामिति शेषः । अस्य–तस्य यतेरितियावत् । इहापि–अत्र जन्मन्यपि, किमुतामुत्रेति भावः । प्रशमलसदन्तःकरणिका–प्रशमेन शान्त्या लसत् शोभमानम् अन्तःकरणं हृदयं यस्यां सा तथा । समप्रेमस्थेमप्रसरजयिनी–समः समता तेन तत्र वा यः प्रेमस्थेमा प्रीतिपूर्विका स्थिरता तस्य यः प्रसरो विस्तारः तं जयतीति जयिनी तादृशी, समभावजनितप्रेमस्थिरतातोऽप्यतिशेतेऽसौ भगवत्पार्श्वनाथगुणानुरागमननजनितचित्तप्रसन्नता । मोक्षकणिका–मुक्तिलेशिका । उदेति–उदयते, तथाभूतो मुनिरिहैव मुक्तिसुखास्वादमनुभवतीतिभावः ॥२०॥

फणैः पृथ्वीं पृथ्वीं कथमिह फणीन्द्रः सुमृदुभि-
र्हरिन्नागा रागात् कथमतिभरक्लान्ततनवः ।
क्व कूर्मो वा धत्तां निभृततनुरेको जलचरः,
पटुर्धर्मः शर्मप्रभव ! तव तां धर्तुमखिलाम् ॥२१॥

वृत्तिः—इह—विश्वेऽत्र । शर्मप्रभव !—कल्याणकारण ! फणीन्द्रः—शेषनागः । सुमृदुभिः—सुकोमलैः । फणैः—सटाभिः । पृथ्वीम्—विशालाम् । पृथुशब्दस्य स्त्रीत्वे द्वितीयैकवचनम् । पृथ्वीम्—पृथिवीम् । कथम्—केनप्रकारेण, धारयतु । हरिन्नागाः—दिग्गजाः, 'हरिद् दिक्षु तृणान्तरे, वर्णभेदेऽश्वभेदे चे'ति । 'नागो मतङ्गजे सर्पे, पुंनागे नागकेसरे; क्रूराचारे नागदन्ते, मुस्तके वारिदेऽपि च । देहानिलविशेषे च, श्रेष्ठे स्यादुत्तरस्थितः' इति चानेकार्थः । रागात्—क्लेशादितः, 'रागः स्याल्लोहितादिषु; गान्धारादौ क्लेशादिकेऽनुरागे मत्सरे नृपे' इत्यनेकार्थः । अतिभरक्लान्ततनवः—भारातिशयखिन्नशरीराः, सन्तः । कथम्—केनप्रकारेण, धारयन्तु । निभृततनुः—निश्चलदेहः । एकः—असहायः । जलचरः—जलजन्तुः । कूर्म्मः—कच्छपः । वा—समुच्चये । क्व—कथम्, अव्ययानामनेकार्थत्वात् । धत्ताम्—धारयतु । अखिलाम्—सकलाम् । ताम्—पृथ्वीम् । धर्तुम्—धारयितुम् । तव—भवतः । धर्मः—वृषः, क्षमादिकः । पटुः—कुशलः, भवतां धर्म एव सर्वथा पृथिवीधारणक्षमो न शेषनागादिरिति भावः ॥२१॥

ज्वलन् ज्वालाजालैर्ज्वलनजनितैर्देव ! भवता,
बहिः कृष्टः काष्ठात् कमठहठपूरैः सह दितात् ।

**नमस्कारैः स्फारैर्दलितदुरितः सद्गुणफणी,**
**किमद्यापि प्रापि प्रथितयशसा नेन्द्रपदवीम् ॥२२॥**

वृत्तिः—**देव !**—देवाधिदेव ! **ज्वलनजनितैः**—अनलोत्पादितैः । **ज्वालाजालैः**—शिखाकदम्बकैः । **ज्वलन्**—दाहमनुभवन् । **भवता**—श्रीमता भगवता । **दितात्**—खण्डितात्, विदारितादितियावत् । **काष्ठात्**—इन्धनात् । **कमठहठपूरैः**—कमठस्य तन्नामकस्याज्ञानतपस्विनो हठा आग्रहा एव पूरास्तैस्तथा । **सह**—साकम् । **बहिः**—बाह्यप्रदेशम् । **कृष्टः**—निःसारितः । **स्फारैः**—समुज्ज्वलैः । **नमस्कारैः**—अनेकशः श्रावितपञ्चपरमेष्ठिनमस्कारमहामन्त्रैः । **दलितदुरितः**—विनाशितपापः । **सद्गुणफणी**—साम्यगुणवान् नागः । **प्रथितयशसा**—विततवर्णवादेन । **अद्यापि**—यावदद्य, अद्यत्वेऽपीतियावत् । **इन्द्रपदवीम्**—धरणेन्द्रपदम् । **न**—नहि । **प्रापि**—प्रापितः । **किम्**—किमु? प्रश्नार्थकमव्ययम्, अपितु प्रापित एवेति भावः । वृत्तं त्वत्रत्यं व्यक्तमेव ॥२२॥

**महारम्भा दम्भाः शठकमठपञ्चाग्निजनिता-**
**स्त्वया दीर्णाः शीर्णाखिलदुरितकौतूहलकृता ।**
**किमाश्चर्यं वर्यं तदिह निहताः किं न रविणा;**
**विनायासं व्यासं रजनिषु गता ध्वान्तनिकराः ॥२३॥**

वृत्तिः—**शीर्णाखिलदुरितकौतूहलकृता**—शीर्णानि विनाशितानि यान्यखिलदुरितानि तैः कौतूहलं, कुतूहलमेव कौतूहलं कौतुकं तत् करोतीति तत्कृत् तेन तथा । **त्वया**—भवता पार्श्वनाथेन । **शठकमठपञ्चाग्निजनिताः**—शठेन धूर्तेन कमठेन तदाख्यविख्यातेन तापसविशेषेण पञ्चाग्निभिः परितश्चतुर्दिक्षु ज्वलत्काष्ठाग्नय उपरि च सूर्याग्नि-

रिति तैर्जनिता उत्पादिताः। **दम्भाः**- दम्भरूपाः । **महारम्भाः—**गुरुकर्माणि, तुङ्गायासा इतियावत् । **दीर्णाः—**विदारिताः, व्यर्थतां नीता इति यावत् । **तत्—**तस्माद्धेतोः । **इह—**अस्मिन् विषये । **वयम्—**महत् । **आश्चर्यम्—**अद्भुतम् । **किम्—**निषेधार्थकमव्ययम्, 'किं कुत्सायां वितर्के च, निषेधप्रश्नयोरपि'इतिमेदिनी । **रविणा—**सूर्येण । **रजनिषु—**रात्रिषु । **व्यामम्**--विस्तारम् । **गताः**—प्राप्ताः । **ध्वान्तनिकराः—**अन्धकारसमूहाः । **आयामम्—**प्रयत्नम् । **विना—**अन्तरेण । **न—**नहि । **निहताः—**विनाशिताः । **किम् ?—**किमु ?, अपितु निहता एवेति भावः । तत्र यथा नाश्चर्यं तथाऽत्रापि नैवाश्चर्यम् ॥२३॥

**ज्वलत्काष्ठक्रोडात् फणिपतिसमाकर्षणभवं,**
**यशः कर्षत्युच्चैस्तव परयशःकारणगुणात् ।**
**इदं चित्रं काष्ठाद् बहिरपसृताज्जातमहितो,**
**न यत् स्पष्टं काष्ठापमरणरसं हन्त ! वहति ॥२४॥**

वृत्तिः—**ज्वलत्काष्ठक्रोडात्—**ज्वलतः काष्ठस्य क्रोडात् अङ्कतः मध्यभागादितियावत् । **फणिपतिसमाकर्षणभवम्—**नागराजसमुद्धरणजनितम् । **यशः—**वर्णवादः । **तव—**भवतः । **परयशःकारणगुणात्—**परः अन्यः विलक्षणः यशःकारणगुणः यशोजनक ज्ञानदयादिगुणः,तस्मात्तथा। **उच्चैः कर्षति—**उत्कृष्टं भवति, भवदीयं ज्वलत्काष्ठापादानकसर्पसमाकर्षणजनितं यशोऽन्ययशसः सकाशादुत्कृष्टमिति भावः । **काष्ठात्—**दारुणः सकाशात् । **बहिः—**बाह्यप्रदेशम् । **अपसृतात्—**निःसृतात् । **अहितः—**सर्पात् । **जातम्—**उत्पन्नम्, ( यशः ) । **स्पष्टम्—**प्रकटं यथास्यात्तथा । **हन्त !—**नूनम्, 'हन्त दानेऽनुकम्पायां, वाक्यारम्भविषादयोः, निश्चये

च प्रमोदे चे'त्यनेकार्थः । **काष्ठापसरणरसम्**—काष्ठापादनकदूरीभवनानुरागम्। **न**—नहि। **वहति**—धारयति **इदम्**—एतत्। **चित्रम्**—अद्भुतम्, 'कारणगुणा हि कार्यगुणानारभन्ते'इति नियमः, प्रकृते तु न तथेति चित्रम्, तथाच विरोधः, परिहारस्तु उत्कर्षापादनकदूरगमनानुरागम्, काष्ठाशब्दः प्रकर्षार्थोऽत्र, 'काष्ठं दारुणि काष्ठा तु, प्रकर्षे स्थानमात्रके; दिशिदारुहरिद्रायां, कालमानप्रभिद्यपी'त्यनेकार्थः । भवदीयं यशो नीचैर्न भवतीति रहस्यम् ॥२४॥

**द्विषत्तापव्यापप्रथनपटुभिर्मोहमथनैः,**
**प्रतापैराक्रान्तस्तव न कमठः कान्तिमधृत ।**
**महोभिः सूरस्य प्रथितरुचिपूरस्य दलित-**
**द्युतिस्तोमः सोमः श्रयति किमु शोभालवमपि ॥२५॥**

वृत्तिः—**तव**—भवतः पार्श्वप्रभोः । **द्विषत्तापव्यापप्रथनपटुभिः**—द्विषत्सु शत्रुषु तापव्यापस्य सन्तापप्रसरस्य प्रथने प्रकटने पटुभिः कुशलैस्तथा । **मोहमथनैः**—मोहविध्वंसकैः । **प्रतापैः**—प्रभावैः, तेजोभिरिति यावत्। **आक्रान्तः**—अभियुक्तः,अभिभूत इतियावत्। **कमठः**—तदभिधस्तापसः । **कान्तिम्**—द्युतिम्, शोभामितियावत । **न**—न खलु । **अधृत**—धृतवान् । **प्रथितरुचिपूरस्य**—प्रथितं रुचेः प्रभायाः पूरं येन स तस्य तथा। यद्यपि पूरशब्दो जलविस्तारवाचकस्तथाप्यत्र लक्षणया केवलविस्तारार्थको विज्ञेयः । **सूरस्य**—सूर्यस्य । **महोभिः**—तेजोभिः । **दलितद्युतिस्तोमः**—विनाशितकान्तिनिकरः । **सोमः**—चन्द्रः । **शोभालवम्**—कान्तिकलाम्, द्युतिलेशमिति यावत्। **अपि**—खलु । **श्रयति**—आश्रयति, धत्त इति यावत् । **किमु**-निषेधार्थकम्, प्रश्नार्थके तु काका-न श्रयतीति बोध्यम्। दृष्टान्तालङ्कारः ॥२५॥

विकासः पद्मानां भवति तमसामप्युपशमः,
प्रलीयन्ते दोषा व्रजति भवपङ्कोऽपि विलयम् ।
प्रकाशः प्रोन्मीलेत् तव जिन ! जगज्जित्वरगुण !-
प्रतापानां भानोरिव जगदभिव्याप्तिसमये ॥२६॥

वृत्तिः—जगज्जित्वरगुण !—जगतां भुवनानां जित्वरा विजय-शीला गुणा यस्य स जगज्जित्वरगुणस्तदामन्त्रणे तथा । जिन !—अर्हन् ! भानोः—सूर्यस्य । इव—यथा । तव—भवतः । प्रतापानाम्—प्रभावाणाम्, तेजसाञ्च । जगदभिव्याप्तिसमये—विश्वाभिव्यापनकाले । पद्मानाम्—लक्ष्मीणाम्, कमलानाञ्च, भविककमलानामपि । विकासः—समृद्धिर्वि-कसनञ्च । भवति—जायते । अपि—पुनः । तमसाम्—अज्ञानानाम्, अन्धकाराणाञ्च । उपशमः—शान्तिः, उपरम इतियावत्, भवतीत्यत्राप्य-नुसन्धेयम् । दोषाः—दूषणानि, रात्रयश्च, 'दोषा निशि निशामुखे' इत्य-नेकार्थः, रात्रिवाचकं दोषाऽव्ययम् । प्रलीयन्ते—प्रकर्षेण विनश्यन्ति । भवपङ्कः—भवः संसार एव पङ्कः, भव उत्पन्नो वा पङ्कः पापम्, पक्षे भव उत्पन्नः पङ्कः कर्दमः । अपि—खलु । विलयम्—विनाशम् । व्रजति—प्रयाति । प्रकाशः—ज्ञानालोकः, प्रद्योतश्च । प्रोन्मीलेत्—समुद्भवेत्, समुद्भवतीति यावत् । श्लेषानुप्राणिता उपमा ॥२६॥

किमु स्पष्टैः कष्टैः किमु परिणतैरासनशतैः,
प्रयोगा योगानां नहि भववियोगाय पटवः ।
त्वदाज्ञा चेदेका शिरसि न विवेकादुपहृता,
विना वीर्यं कार्यं न भवति नृणां भेषजगणैः ॥२७॥

वृत्तिः—**चेत्**-यदि । **एका**-केवला, अद्वितीयेति यावत् । **त्वदाज्ञा**-भवदनुशासनम् । **विवेकात्**-विनयापरपर्यायहिताहितविवेचकगुणयोगतः । **शिरसि**-मस्तके । **न**-नहि । **धृता**-स्थापिता, (तदा) **स्पष्टैः**-प्रकटैः । **कष्टैः**-देहदमनैः । **किमु ?**-किमपि फलं नास्तीत्यर्थः । **परिणतैः**-परिपाकं गतैः । **आसनशतैः**-बहुविधयोगासनैः । **किमु ?**-न किमपीत्यर्थः । **योगानाम्**-चित्तवृत्तिनिरोधादिकात्मनाम् । **प्रयोगाः**-अनुष्ठानानि । **भववियोगाय**-संसारविच्छेदाय । **पटवः**-समर्थाः । **नहि**-न खलु, एतदर्थान्तरन्यासेन समर्थयति विना वीर्यमित्यादि । **वीर्यम्**-शक्तिविशेषम्, चैतन्यमिति यावत् । **विना**-अन्तरेण । **भेषजगणैः**-औषधिसमूहैः । **नृणाम्**-नराणाम्, 'नुर्वा' ।१।४।४८। इति वैकल्पिकदीर्घत्वान्नृणामिति । **कार्यम्**-स्वास्थ्यादिफलम् । **न भवति**-नैव जायते । यथा वीर्यं विना भेषजगणोऽपि नारोग्यं प्रयच्छति तथा भवदाज्ञापालनमन्तरेण कायकष्टविविधासनबन्धयोगप्रक्रियाकरणादीन्यपि न फलवन्ति भवन्तीति भावः ॥२७।

**नराः शीर्षे शेषामिव तव विशेषार्थविदुषः,**
**शतै राज्ञामाज्ञामिह दधति ये देव ! महिताम् ।**
**अविश्रामैस्तेषामहमहमिकायातनृपति-**
**प्रणामैरुद्दामैः समुदयति कीर्तिर्दिशि दिशि ॥२८॥**

वृत्तिः—**देव !**-देवाधिदेव ! पार्श्वजिनवर ! **इह**-अत्र लोके । **ये**-बुद्धिविषयीभूताः । **नराः**-मनुष्याः भव्यात्मान इति यावत् । **विशेषार्थविदुषः**-विशेषेण सकलपदार्थस्वरूपविदः, केवलज्ञानिन इति यावत् । **तव**-भवतः, पार्श्वनाथस्य । **शेषाम्**-निर्माल्यदानमिव, 'शेषा

निर्माल्यदाने स्या'दित्यनेकार्थः, 'शेषामिव भर्तुराज्ञा'मितिकुमारे। इव—यथा, आचारनिष्ठा जनाः प्राप्तां शेषां मस्तके निधायाङ्गीकुर्वन्तीतिवत्। **महिताम्**—समर्चिताम्। **राज्ञाम्**-भूपतीनाम्। **शतैः**-शतसङ्ख्यैः। **आज्ञाम्**—आदेशम्। **शीर्षे**—शिरसि। **दधति**—धारयन्ति। **तेषाम्**—तादृशां भव्यात्मनाम्। **उद्दामैः**—उत्कटैः। **अविश्रामैः**—अविरतैः। **शतैः**—शतसङ्ख्याकैः असङ्ख्यैरितियावत्। **अहमहमिकायातनृपतिप्रणामैः**—अहं पूर्वमहंपूर्वमित्यहमहमिका तया आयातानां समागतानां नृपतीनां प्रणामैः प्रणतिभिः कृत्वा। **कीर्तिः**—यशः। **दिशि दिशि**—प्रतिदिशम्। **समुदयति**—समुत्पद्यते, प्रसरतीतियावत् ॥२८॥

जगत्स्वामी चामीकररजतरत्नोपरचितै-
र्विशालैस्त्वं सालैः परमरमणीयद्युतिरसि।
तव ब्रूते भूतेः समवसरणक्ष्माऽप्यतिशयं,
ध्वजव्याजभ्राजत्सरसरसना दुन्दुभिरवैः ॥२९॥

वृत्तिः—**चामीकररजतरत्नोपरचितैः**—सुवर्णरजतरत्नसम्पादितैः। **विशालैः**—प्रथुलैः। **सालैः**—प्राकारैः। **जगत्स्वामी**—विश्वाधिपः। **त्वम्**—पार्श्वनाथस्त्वम्। **परमरमणीयद्युतिः**—निरतिशयकमनीयकान्तिः। **असि**—वर्तसे। **समवसरणक्ष्मा**—देशनाभूमिः। **अपि**—खलु। **ध्वजव्याजभ्राजत्सरसरसना**-ध्वजव्याजेन ध्वजकपटेन भ्राजन्ती सरसा रसना यस्याः सा तादृशी, समवसरणक्ष्मा। **दुन्दुभिरवैः**—तन्नामविश्रुतवाद्यध्वनिभिः। **तव**—भवतः पार्श्वप्रभोः। **भूतेः**—ऐश्वर्यस्य। **अतिशयम्**—उत्कर्षविशेषम्। **ब्रूते**—निगदति, प्रकाशयतीति यावत् ॥२९॥

सभायामायाताः सुरनरतिरश्चां तव गणाः,
स्फुटाटोपं कोपं न दधति न पीडामपि मिथः ।
न भीतिं नानीतिं त्वदतिशयतः केवलमिमे,
सकर्णाः कर्णाभ्यां गिरमिह पिबन्ति प्रतिकलम् ॥३०॥

वृत्तिः – तव–भवतः । सभायाम्–परिषदि, समवसरण इति यावत् । आयाताः–समुपस्थिताः । सुरनरतिरश्चाम्–देवमनुजपशूनाम् । गणाः–समुदयाः । मिथः–परस्परम् । स्फुटाटोपम्–प्रकटावेशम् । कोपम्–क्रोधम् । न–नहि । दधति–धारयन्ति । अपि–पुनः । पीडाम्–बाधाम् । न-न खलु, (दधति । भीतिम्–भयम् । न–नैव, दधति)। अनीतिम्–नीतिविरुद्धाचरणम् । न–न च, (दधति) । त्वदतिशयतः–भवतोऽतिशयस्य प्रभावात् । इमे–एते, अमरनरतिर्यञ्चः । सकर्णाः–सज्जश्रवणेन्द्रियाः, तत्परा इति यावत्, सुधिय इत्यपि । इह-सभायाम् । केवलं गिरम्–वाणीमेव । प्रतिकलम्–प्रतिक्षणम् । पिबन्ति–पीयन्ते, शृण्वन्तीतियावत्, लाक्षणिकोऽयं प्रयोगः ॥३०॥

गिरः पायं पायं तव गलदपायं किमभवन्,
सुधापाने जाने नियतमलसा एव त्रिबुधाः ।
तदक्षुद्रा मुद्रा सितमहसि पीयूषनिलये,
निजायत्ता दत्ता जठरविलुठल्लक्ष्ममिषतः ॥३१॥

वृत्तिः—प्रभो ! त्रिबुधाः–देवाः । गलदपायम्–गलन्तो विनश्यन्तोऽपाया विपदो यस्मिन् कर्मणि तद्यथा स्यात् तथा । तव–भवतः । गिरः–देशनावचांसि । पायं पायम्–पीत्वा पीत्वा । सुधापाने–पीयूषपानकरणे । नियतम्–निश्चितम् । अलसाः–प्रमादिनः । एव-खलु ।

**अभवन्**—समजनिषत । **किम्**—? **तत्**—ततः । **पीयूषनिलये**—अमृतावासे, सुधादीधितौ । **सितमहसि**—शीतांशौ, चन्द्र इतियावत् । **जठरविलुठल्लक्ष्ममिषतः**—मध्यभागविलसत्कलङ्काङ्कव्याजात् । **निजायत्ता**—स्वाधीना । **अक्षुद्रा**—महती । **मुद्रा**—सचिह्नं दृढं पिधानम् । **दत्ता**—संयोजिता । **जाने**—उत्प्रेक्षाभिव्यञ्जकम् । यद्यपि 'मन्ये शङ्के ध्रुवं प्रायो, नूनमित्यवमादिभिः । उत्प्रेक्षा व्यज्यते शब्दै-रिवशब्दोऽपि तादृशः' इति दण्डिकृतकाव्यादर्शीयकारिकायां 'जाने' इत्यस्य नामग्राहमुल्लेखो नास्ति, तथापि आदि शब्देनास्योत्प्रेक्षा व्यञ्जकताऽवसेया । साहित्यदर्पणे विश्वनाथेन 'मुक्तोत्करः संकटशुक्ति-मध्याद्विनिर्गतः सारसलोचनायाः । जानीमहेऽस्याः कमनीयकम्बुग्रीवाधिवासाद् गुणवत्त्वमाप' इति-सूक्तविवरणप्रसङ्गे 'अत्र जानीमहे इत्युत्प्रेक्षावाचक' मितिप्रतिपादनात् । अत्रेदं श्लोकरहस्यम् यथा जना असति प्रयोजने स्वं वस्तु बद्ध्वा सुरक्षन्ति तथा देवा अपि सुधाशनाः पीयूषनिधिं चन्द्रमसं लक्ष्मात्मकपिधानेन दृढं पिधाय रक्षन्ति, तेषाममृतमप्रयोजनकं जातमस्तीति, किमिति तदनुपयुक्तमभूदिति चेत् ? प्रभोः वचनामृतपाने न तृप्तत्वात्तेषामिति ॥३ ॥

> **तनीयानप्युच्चैर्न पटुरशनीयापरिभवः,**
> **पिपासाऽपि क्वापि स्फुरति न भवद्गीःश्रवणतः ।**
> **भवेत् साक्षाद् द्राक्षारससिकता हन्त ! बहुधा,**
> **सुधास्वादः सद्यः किमु समुदयेन्नाधिवसुधम् ॥३२॥**

वृत्ति —**भवद्गीःश्रवणतः**— भगवद्देशनावचनाकर्णनात् । **उच्चैः**—अतिशयम् । **तनीयान्**—अल्पीयान् । **अपि**—खलु । **अशनीयापरिभवः**—बुभुक्षायात्रासः, भोजनसम्बन्धी परितः परिभवः । **न**—नहि ।

पटुः—समर्थः । क्वापि—कुत्रचिदपि । पिपासा—पानाभिलाषः । अपि—खलु । न—नैव । स्फुरति—प्रादुर्भवति । हन्त—हर्षेऽव्ययम् । बहुधा—अनेकधा । साक्षात्—प्रत्यक्षं यथा स्यात्तथा । द्राक्षारससिक्ता—मृद्धिकामध्यवर्तिमसृणरसमधुरतानुभवः । भवेत्—जायेत । अधिवसुधम्—भूमण्डले । सद्यः—श्रवणसमन्तरमेव । सुधास्वादः—अमृतास्वादनानुभवः । न—नहि । समुदयेत्—समुत्पद्येत । किमु—सम्भावनायाम्, अपि तु समुदयेदेवेति भावः ॥३२॥

ब्रुवाणैर्गीर्वाणैर्जिन ! सितकरं कीर्तिनिकरं,
तव प्रत्नै रत्नैर्झटिति घटिता धर्मपरिषत् ।
अमन्दा मन्दारद्रुमकुसुमसौरभ्यसुभगा,
न किं चित्ते धत्ते भुवनभविनां मेदुरमुदम् ॥३३॥

वृत्तिः—जिन !—अर्हन् ! ( भवतः ) सितकरम्—चन्द्ररूपम । कीर्तिनिकरम्-यशःसमूहम् । ब्रुवाणैः—गायद्भिः । गीर्वाणैः—देवैः । प्रत्नैः—प्राचीनैः । रत्नैः—मणिभिः । झटिति—सत्वरम् । घटिता—रचिता । अमन्दा—सातिशया । मन्दारद्रुमकुसुमसौरभ्यसुभगा—मन्दाराभिधसुरतरुसुमनःसौगन्ध्यसौभाग्यशालिनी । तव—भवतः । धर्मपरिषत्—धर्मसभा, समवसरणमितियावत् । भुवनभविनाम्—भुवनेषु लोकेषु ये भविनो मोक्षगमनयोग्यजीवात्मानस्तेषां तथा । चित्ते—मानसे । किम्—प्रश्नार्थकमव्ययम् । मेदुरमुदम्—पुष्टमानन्दम् । न—नहि । धत्ते—धारयति, अपितु धारयत्येवेति भावः ॥३३॥

अशोकस्ते श्लोकश्रवणजनितोऽयं जयति किं,
शिरो धुन्वन् भूयश्चपलदलदम्भादतिमुदः ।

समस्तोदस्तोद्यद्दुरितपटलस्य प्रतिभुवः,
शिवश्रीलाभस्य प्रथितगुणरत्नव्रजभुवः ॥३४॥

वृत्तिः—समस्तोदस्तोद्यद्दुरितपटलस्य—समस्तमशेषम् उदस्तं दूरीकृतम् उद्यत उदयमानस्य दुरितस्य कल्मषस्य पटलं कदम्बकं येन तस्य तथा । प्रथितगुणरत्नव्रजभुवः—प्रथितानि प्रसिद्धानि च तानि ज्ञानादयो गुणा एव रत्नानि प्रथितगुणरत्नानि तेषां व्रजं भवत्यस्मादिति प्रथितगुणरत्नव्रजभूस्तस्य तथा । शिवश्रीलाभस्य—मुक्तिलक्ष्मीप्राप्तेः । प्रतिभुवः—लग्नकस्य, साक्षिविशेषस्येति यावत्, 'प्रतिभूर्लग्नकः' इत्यभिधानः । ते—तव । श्लोकश्रवणजनितः—वर्णवादाकर्णनोत्पादितः । अशोकः—अशोकतरुः । अयम्—पुरोवर्ती । अतिमुदः—निरतिशयमानन्दितः सन् । भूयः—पुनः । चपलदलदम्भात्—चलाचलकिसलयकपटतः । शिरः—मस्तकम् । धुन्वन्—कम्पयन् । जयति—सर्वोत्कर्षेण वर्तते । किम्—सम्भावनायाम् ॥३४॥

जगद्भानोर्जानोः सममसमसौरभ्यकलितं,
पुरः के वा देवास्तव न दधते पुष्पनिकरम् ।
प्रसर्पत्कन्दर्पस्मयमथन—मुक्ताश्रव भवत्-
प्रभावादस्यापि व्रजति नियतं बन्धनमधः ॥३५॥

वृत्तिः—प्रभो ! प्रसर्पत्कन्दर्पस्मयमथन !—प्रसृत्वरमदनमदविनाशन ! मुक्ताश्रव !—परित्यक्तकर्मागमनकारण ! जगद्भानोः—भुवनभास्करस्य । तव—भवतः, भगवतः । पुरः—समीपे । के वा—के पुनः । देवाः—अमराः । जानोः समम्—जानुदेशतुल्यम्, जानुप्रमाणं जानुदघ्नमितियावत् । असमसौरभ्यकलितम्—अनुपमेयसौगन्ध्यसमन्वितम् ।

पुष्पनिकरम्–सुमनसां सञ्चयम् । न दधते–नहि विस्तारयन्ति, अपि तु दधत एव। भवत्प्रभावात्–भगवतस्तवातिशयितानुभावतः । अस्यापि-पुष्पनिकरस्यापि । बन्धनम्, अधः–निम्नभागे । नियतम्–निश्चितम् । व्रजति–प्रयाति ॥३५॥

गलद्रोधं बोधं निजनिजगिरा श्रोतृनिकरा,
लभन्ते हन्तेह त्वदुदितगिरा नात्तभिदया ।
इमां ते योगर्द्धिं न खलु कुशला स्पर्द्धितुमहो,
परे धामक्रामद् गगनमिव सूर्य्यस्य शलभाः ॥३६॥

वृत्तिः—इह–विश्वे ऽस्मिन् । श्रोतृनिकराः–श्रवणोत्कात्मनां समुदयाः । नात्तभिदया–अस्वीकृतभेदया, अभिन्नयेतियावत् । त्वदुदितगिरा–भवदुदीरितवाण्या । निजनिजगिरा-स्वस्वभाषया । गलद्रोधम्–अप्रतिबन्धं यथास्यात्तथा । बोधम्–सम्यग्ज्ञानम् । लभन्ते–प्राप्नुवन्ति । हन्त !–हर्षेऽव्ययम् । शलभाः–पतङ्गाः । गगनम्–आकाशम् । क्रामत्–उपसर्पत् । सूर्य्यस्य–दिवाकरस्य । धाम–तेजः । इव–यथा । परे–अन्यतीर्थिकाः । इमाम्–प्रत्यक्षदृश्याम्, पूर्वोदिताम् । ते–भवतः । योगर्द्धिम्–योगसमृद्धिम् । स्पर्द्धितुम्–तुलयितुम् । कुशलाः–निपुणाः । न खलु–नैव । अहो–अद्भुतम् । उदाहरणालङ्कारः । 'सामान्यतो निरूपितस्यार्थस्य विशेषतो निरूपणायोच्यमानोऽवयवावयविभाव उदाहरणम्' इति तल्लक्षणात् ॥३६॥

मुखेन्दुज्योत्स्नेव स्फुटतनुलसत्कान्तियमुना–
प्रशंसा (प्रशस्ता) हंसाली किमु किमुत पुण्यर्द्धिरखिला ।

स्मितश्रीः किं लक्ष्म्याः किमुत परमध्यानघटना,
प्रभो ! त्वन्मौलिस्था विलसति सिता चामरततिः ॥३७॥

वृत्तिः—प्रभो !—परमात्मान् ! त्वन्मौलिस्था—भवदुत्तमाङ्गवर्तिनी । सिता—शुभ्रा । चामरततिः—चमरावली । मुखेन्दुज्योत्स्नेव—वदनचन्द्रचन्द्रिकासमा । स्फुटतनुलसत्कान्तियमुनाप्रशंसा (प्रशस्ता) हंसाली—स्फुटा प्रकटा या तनोः वपुषः लसन्ती कान्तिः प्रभा सैव-यमुना तत्र प्रशस्ता श्रेष्ठा हंसाली मरालमाला । किमु—किम् ? उत्प्रेक्षायाम् अग्रेऽप्येवम् । उत—अथवा । अखिला—सकला । पुण्यर्द्धिः—सुकृतसमृद्धिः । किम्, लक्ष्म्याः—श्रियः । स्मितश्रीः—हाससम्पत् । किम्, उत—अथवा । परमध्यानघटना—उत्तमध्यानरचना । किम्, विलसति—चकास्ते । उत्प्रेक्षा ॥३७॥

न किं देवाः सेवां विदधति मृगेन्द्रासनजुष,-
स्तव प्रौढाम्भोदप्रतिमवपुषः पुण्यजनुषः ।
प्रदेशे स्वर्णाद्रेः क्वचन रुचिरे नन्दनवने,
प्रियङ्गोः सङ्गोत्काः किमु न सततं षट्पदगणाः ॥३८॥

वृत्तिः—देवाः—इन्द्रादयोऽमराः । प्रौढाम्भोदप्रतिमवपुषः—सघनजलदसमशरीरस्य । पुण्यजनुषः—पवित्रजन्मनः, सुकृतप्रभवस्य च । मृगेन्द्रासनजुषः—सिंहासने विराजमानस्य । तव—भगवतः पार्श्वप्रभोः । सेवाम्—उपास्तिम् । किम्—किमु । न—नहि । विदधति—कुर्वन्ति, अपि तु विदधत्येव । दृष्टान्तेन समर्थयति प्रदेश इत्यादि । षट्पदगणाः—भ्रमरसमूहाः । स्वर्णाद्रेः—सुवर्णाचलस्य । क्वचन—क्वचित् अपि । प्रदेशे—प्रान्ते, स्थाने इति यावत् । रुचिरे—मनोरमे । नन्दन-

वने—तदाख्याविख्यातविपिने । सततम्—सर्वदा । प्रियङ्गोः—तन्नाम-प्रसिद्धवृक्षस्य । सङ्गोत्काः—सङ्गमसमुत्सुकाः । किमु—किम्। न—नहि, अपि तु सङ्गोत्का एव । दृष्टान्तः ॥३८॥

अभून्नेन्दुर्भूयःप्रभविभुमुखीभूय न सुखी,
तमोग्रासोल्लासस्तदिह ननु मय्येव पतितः ।
इदं मत्वा सत्वात् किमु तव रविर्मौलिमधुना,
श्रितो नेतश्चेतःसुखजननभामण्डलमिषात् ॥३९॥

वृत्तिः—इन्दुः—चन्द्रमाः। भूयःप्रभविभुमुखीभूय—अधिककान्त-प्रभुवदनरूपो भूत्वा । सुखी—निर्वृतः, शर्म्मवानितियावत् । न न अभूत्—नञ्द्वयस्य प्रकृतार्थावबोधनाद् दार्ढ्यावगमकत्वाच्च अभूदेव । तत्—ततः । इह—अत्र लोके । तमोग्रासोल्लासः—राहूपरागातिशयः । ननु—नूनम् । मय्येव—सूर्य्यात्मके मयि खलु । पतितः—समागतः । इदम्—इत्येतत् । सत्त्वात्—सत्त्वतः, सामर्थ्यादिति यावत् । मत्त्वा—अवबुध्य । नेतः!—अयि स्वामिन्! रविः—सूर्य्यः। अधुना—साम्प्रतम्। चेतःसुखजननभामण्डलमिषात्—मनोमोदोत्पादकप्रभामण्डलव्याजतः । तव—भवतः । मौलिम्—मस्तकम् । श्रितः—आश्रितः । किमु—किम् । उत्प्रेक्षाव्यञ्जकम् । अपह्नुत्यनुप्राणितोत्प्रेक्षा ॥३९॥

स्फुरत्कैवल्यश्रीपरिणयनदिव्योत्सवमिव,
त्रिलोकीलुण्टाकस्मरजयरमाताण्डवमिव ।
सदा धामस्थामप्रसरमिव शंसन्नतितरां,
तवाकाशेऽकस्मात् स्फुरति पुरतो दुन्दुभिरवः ॥४०॥

वृत्तिः—तव—भवतः । पुरतः-पुरस्तात । अकस्मात्—सहसा । आकाशे-गगने । स्फुरत्कैवल्यश्रीपरिणयनदिव्योत्सवम्-स्फुरन्त्याः विलसन्त्याः कैवल्यश्रियाः केवलज्ञानलक्ष्म्याः मुक्तिरमाया वा त्वत्सम्बन्धिन्या इति यावत, परिणयने विवाहविधौ यो दिव्योत्सवः परमो महोत्सवस्तं तथा। शंसन्—उद्घोषयन् । इव—उत्प्रेक्षाभिव्यञ्जकम् । त्रिलोकीलुण्टाकस्मरजयरमाताण्डवम्-भुवनत्रयलुण्टनशीलं कामदेवं विजित्य भवताऽधिगताया विजयश्रियाः नटनम् । शंसन् इव, सदा—सततम्। धामस्थामप्रसरम्-तेजःस्थैर्य्यप्रसारम्। अतितराम्—अतिशयेन। शंसन् इव, दुन्दुभिरवः—सुरदुन्दुभिध्वनिः । स्फुरति—विलसति । उत्प्रेक्षा ॥४०॥

परं चिह्नं विश्वत्रितयजयदिव्यव्यवसितेः,
कृतव्यापत्तापत्रयविलयसौभाग्यनिलयः ।
धृतं हस्तैः शस्तैस्त्रिदशपतिभिः प्रेमतरलै,—
र्भवन्मौलौ छत्रत्रयमतितरां भाति भगवन् ॥४१॥

वृत्तिः—भगवन् !—प्रभो ! विश्वत्रितयजयदिव्यव्यवसितेः—त्रिभुवनविजयाद्भुतव्यवसायस्य । परम्—परमम् । चिह्नम्—लक्षणम् । कृतव्यापत्तापत्रयविलयसौभाग्यनिलयः—विहितविशिष्टापदः तापत्रयस्य आध्यात्मिकाधिदैविकाधिभौतिकात्मकतापत्रितयस्य विलयेन विनाशेन यत् सौभाग्यं तस्य निलयः सदनम्। प्रेमतरलैः—प्रणयपरिपूर्णैः। त्रिदशपतिभिः-सुराधीशैः (कर्तृभिः) । शस्तैः—प्रशस्तैः । हस्तैः—करैः । धृतम्—संरक्षितम् । छत्रत्रयम्—आतपत्रत्रितयम् । भवन्मौलौ—भगवदुत्तमाङ्गे । अतितराम्—नितराम् । भाति—शोभते । रूपकम ॥४१॥

विलासो नारीणामिह खलु पराभूतिरुदिता,
प्रसिद्धा चान्येषां तव च परमोहव्यवसितिः ।
इदं सर्वं साम्यं तदपि तव तैर्नैव तुलनां,
सहर्षं भाषन्ते परमकवयः कौतुकमदः ॥४२॥

वृत्तिः—इह—लोकेऽस्मिन् । खलु—निश्चयेन । नारीणाम्—रमणीनाम् । विलासः—विभ्रमविशेषः । अन्येषाम्—भवद्भिन्नानाम् । च—पुनः । तव—भवतः । पराभूतिः—परमा ऋद्धिः ( परेषाम् ) पराभवश्च ( तव ) । उदिता—उदयमाप्ता । च—पुनः । परमोहव्यवसितिः—उत्कटमोहव्यवसायः (अन्येषाम्) परमतर्कावधारणम्, ( तव ) । प्रसिद्धा—विदिता, ( यद्यपि ) । इदम्—एतत् । सर्वम्—समस्तम् । साम्यम्—सादृश्यम् । तदपि—तथापि । परमकवयः—कवीश्वराः । तैः—अन्यतीर्थिकैः । तव—भवतः । तुलनाम्—उपमाम् । नैव—नह्येव । भाषन्ते—वर्णयन्ति । अदः—तदेतत् । सहर्षम्—सविस्मयम् । कौतुकम्—कुतूहलम् । तुल्ययोगिता, 'हिताहिते वृत्तितौल्य-मपरा तुल्ययोगिता' इति चन्द्रालोकीयतल्लक्षणात् ॥४२॥

अपारव्यापारव्यसनरसनिर्माणविलय-
स्थितिक्रीडाव्रीडा न खलु तव विश्वे विलसति ।
न कोपं नारोपं न मदमदिरोन्मादमनिशं,
न मोहं न द्रोहं कलयसि निषेव्योऽसि जगतः ॥४३॥

वृत्तिः—भगवन् ! विश्वे—जगति । तव—भवतः । अपारव्यापारव्यसनरसनिर्माणविलयस्थितिक्रीडाव्रीडा— अपारव्यापारेषु-

निरवधिव्यवसायेषु व्यसनमेव रसस्ततो निर्माणविलयस्थितयः—सृष्टि-विनाशावस्थानानि एव क्रीडा लीलास्ताभिर्व्रीडा त्रपा तथा। न-नहि। विलसति-विद्योतते। खलु—वाक्यालङ्कारे। अनिशम्—सर्वदा। कोपम्—क्रोधम्। न—नैव कलयसि। आरोपम्—अध्यासम्, मिथ्या-ज्ञानमिति यावत्। न—कलयसि। मदमदिरोन्मादम्—अहङ्कारसुरा-मत्तताम्। न—कलयसि। मोहम्—अज्ञानम्। न—कलयसि। द्रोहम्—विद्रोहम्। न—कलयसि अनुभवसि, ( अत एव ) ( त्वम् ) जगतः—भुवनस्य। निषेव्यः—सेवनीयः। असि - भवसि ॥४३॥

भवेद् भूतावेशः परतनुनिवेशः कथमहो, ?
परेषां संक्लेशः स्फुरति हि महामोहवशतः।
न चेदेवं देवं यदि चपलयेन्नमरचना,
विलीना दीनाऽसौ तदिह भुवनेऽधीरिमकथा ॥४४॥

वृत्तिः—परेषाम्—परदर्शनिनाम्। महामोहवशतः—उत्कटाज्ञान-सामर्थ्यात्। भूतावेशः—व्यन्तरप्रवेशसदृश। परतनुनिवेशः—पर-कायप्रवेशः। कथम्—केन प्रकारेण। भवेत्—जायेत, ( इत्यात्मकः )। संक्लेशः—परीतापः। हि—निश्चयेन। स्फुरति—विलसति। अहो—धिग्, 'अहो धिगर्थे शोके च, करुणार्थविषादयोः' इति हैमानेकार्थः। चेत्—प्रश्ने। यदि, एवम्—पूर्वकथितमिव। देवम्—भवन्तम्। नर्मरचना—लीलाघटना। न—नैव। चपलयेत्—चञ्चलयेत्। तत्—ततः। इह—अत्र भुवने—लोके। दीना—कृपणा, दयनीयेतियावत्। असौ—उक्तरूपेयम्। अधीरिमकथा—अधैर्य्यवार्ता। विलीना—विलय-माप्ता। अयंभावः, यथा परे देवाः परकीयकायप्रवेशनादिक्रीडाप्रवृत्ति

समुत्कटमोहवशतो विदधते न तथा भवान्. नहि भवन्तं नर्मलीला चपलयितुमीशा यतो भवान् सुमेरुतोऽप्यतिशयितधैर्यवानिति ॥४४॥

त्वदौपम्यं रम्यं यदि हतधियो हन्त ! ददते,
परेषामुल्लेखात् प्रकृतहितदानस्य जगति ।
न किं ते भाषन्ते विषतरुषु कल्पद्रुतुलनां,
प्रलापाः पापानां सपदि मदिरापानजनिताः ॥४५॥

वृत्तिः—यदि—चेत् । हतधियः—नष्टबुद्धयः । परेषाम्—परदर्शनिनाम् । प्रकृतहितदानस्य—प्रस्तुतपरमार्थवितरणस्य । उल्लेखात्—उल्लेखं कृत्वा । जगति—लोके । त्वदौपम्यम्—भवदुपमाम् । ददते—वितरन्ति । हन्त !—खेदे । ते—हतधियोऽमी । विषतरुषु—गरलविटपिषु । कल्पद्रुतुलनाम्—कल्पवृक्षसाम्यम् । न—नहि । भाषन्ते—ब्रुवन्ति । किम् ?—किमु प्रश्ने, अपि तु भाषन्त एव । अर्थान्तरन्यासेन समर्थयति । प्रलापा—इत्यादि । पापानाम्—पापात्मनाम् । मदिरापानजनिताः—सुरापानोद्भाविताः मोहमदिरास्वादनोत्पादिता वा । सपदि—तत्कालम् । प्रलापाः—असम्बद्धवचांसि, भवन्तीति शेषः, अर्थान्तरन्याससङ्कीर्णा निदर्शना ॥४५॥

निशाभ्यः प्रत्यूषे विफलबदरीभ्यः सुरतरौ,
विषेभ्यः पीयूषे चुलुकसलिलेभ्यो जलनिधौ ।
गिरिभ्यः स्वर्णाद्रौ करिणि हरिणेभ्यः खलु यथा,
तथान्येभ्यो नाथ ! त्वयि गुणसमृद्धेरतिशयः ॥४६॥

वृत्तिः—यथा—येन प्रकारेण । निशाभ्यः—रात्रिभ्यः । प्रत्यूषे—प्रभाते, गुणसमृद्धेरतिशय इति सर्वत्रयोजना । विफलबदरीभ्यः—

तुच्छफलककर्कन्धूभ्यः । सुरतरौ—कल्पवृक्षे । विषेभ्यः—गरलतः । पीयूषे—अमृते । चुलुकसलिलेभ्यः—प्रसृतिपतितपानीयेभ्यः । जलनिधौ-महाब्धौ । गिरिभ्यः—पर्वतेभ्यः । स्वर्णाद्रौ—मेरौ । हरिणेभ्यः—मृगेभ्यः । करिणि—गजराजे । खलु—नूनम् । गुणसमृद्धेः—विशिष्ट-गुणसम्पत्तेः । अतिशयः—प्रकर्षः । तथा—तेन प्रकारेण । नाथ !—अयि भगवन् ! अन्येभ्यः-इतरदेवेभ्यः त्वयि—भवति ।गुणसमृद्धेरतिशयः—वर्तते इति शेषः, मालोपमा ॥४६॥

मुखं ते निस्तन्द्रं जितसकलचन्द्रं विजयते,
कृपापात्रे नेत्रे हसितकजपत्रे विलसतः ।
त्वदङ्को वामाक्षी-परिचयकलङ्कोज्झित इति,
प्रभो ! मूर्तिस्फूर्तिस्तव शमरसोल्लासजननी ॥४७॥

वृत्तिः—प्रभो-हे भगवन्! निस्तन्द्रम्-स्फुरद्रूपम्। जितसकलचन्द्रम्-पराजितपरिपूर्णचन्द्रमसम् । ते—तव भगवतः पार्श्वनाथस्य । मुखम्—वदनम् । विजयते—सर्वोत्कर्षेण वर्ततेतराम् । कृपापात्रे—कारुण्यपूर्णे । हसितकजपत्रे—तिरस्कृतनलिनदले, ते । नेत्रे—नयने । विलसतः—राजेतेतराम् । त्वदङ्कः—भवत्क्रोडः । वामाक्षीपरिचयकलङ्कोज्झितः—रमणीसम्पर्कापवादरहितः । इति—अस्मात् कारणात् । तव—श्रीमतो भवतः । मूर्तिस्फूर्तिः—तनुद्युतिः । शमरसोल्लासजननी—प्रशमरससमुल्लासकारिणी, वर्तत इति शेषः। व्यतिरेकालङ्कारध्वनी राजतेऽत्र ॥४७॥

तरी संसाराब्धेर्भुवनभविनां निर्वृतिकरी,
सदा सद्यः प्रोद्यत्सुकृतशतपीयूषलहरी ।

**जरीजृम्भड्डिम्भत्रिदशमणिकान्तिस्मयहरी,**
**वरीवर्ति स्फूर्तिर्गतभव ! भवन्मूर्तिनिलया ॥४८॥**

वृत्तिः—**गतभव !**—संसारसंसरणविरहित ! भगवन् ! पार्श्वनाथ ! **संसाराब्धेः**—भवसागरस्य, तत्सम्बन्धिनीत्यर्थः । **तरी**-नौका । **भुवनभविनाम्**—संसारवर्तिभव्यात्मनाम् । **निर्वृतिकरी**—महानन्दसम्पादिनी, भव्यान् भवात् पारं नीत्वा मोक्षदात्री नौरितियावत् । **सदा**—सर्वदा । **सद्यः**—सपदि । **प्रोद्यत्सुकृतशतपीयूषलहरी**—प्रोल्लसदनन्तपुण्यसुधातरङ्गरूपा । **जरीजृम्भड्डिम्भत्रिदशमणिकान्तिस्मयहरी**—जरीजृम्भन्तोऽतिशयेन विस्फुरमाणा डिम्भाः बालाः नवीना इति यावत् ये त्रिदशमणयो नीलमणयस्तेषां कान्तिस्मयम् दीप्तिगर्वम् हरति दूरीकरोतीति तथा, नवीननीलमणितोऽप्यधिकदीप्तिमतीत्यर्थः । **भवन्मूर्तिनिलया**—भवत्तनूसद्मा, श्रीमच्छरीरवर्तिनीतियावत् । **स्फूर्तिः**—विकचता, लावण्यमितियावत् । **वरीवर्ति**—अतिशयेन वर्तते । अनुप्रासो रूपकञ्च ॥४८॥

**इमां मूर्तिस्फूर्तिं तव जिन ! समुद्वीक्ष्य सुदृशां,**
**सुधाभिः स्वच्छन्दं स्नपितमिव वृन्दं ननु दृशाम् ।**
**कुदृष्टीनां दृष्टिर्भवति विषदिग्धेव किमतो,**
**विना घूकं प्रीतिर्जगति निखिले किं न तरणेः ॥४९॥**

वृत्तिः—**जिन !**—अर्हन् पार्श्वनाथ ! **तव**—श्रीमतो भवतः । **इमाम्**—एताम् । **मूर्तिस्फूर्तिम्**—तनुस्फीतिमानम् । **समुद्वीक्ष्य**—समवलोक्य । **सुदृशाम्**—सम्यग्दृष्टीनाम् । **दृशाम्**-नयनानाम् । **वृन्दम्**-कदम्बकम् । **स्वच्छन्दम्**-यथेच्छम् । **सुधाभिः**-अमृतैः । **ननु**—खलु । **स्नपितम्**-कृतस्नानम् । **इव**—उत्प्रेक्षायाम्, भवतीति शेषः । **कुदृष्टीनाम्**-मिथ्यादृष्टी-

नाम् । दृष्टिः—दृक् , कृतभवन्मूर्तिस्फूर्तिदर्शनं दर्शनमिति यावत् । विषदिग्धेव-गरलोपलिप्तेव । भवति-जायते । अतः-अस्मात् । किम्-किमपि नेत्यर्थः । घूकम्—उलूकम् । विना—अन्तरेण,मुक्त्वेति भावः । निखिले—समस्ते । जगति—भुवने । तरणेः—सूर्य्यस्य । प्रीतिः—प्रणयः । न—भवति । किम् !—अपि भवत्येवेत्यर्थः । उत्प्रेक्षा ॥४९॥

इमां मूर्तिस्फूर्तिं तव जिन ! गतापायपटलं,<br>
नृणां द्रष्टुं स्पष्टं सततमनिमेषत्वमुचितम् ।<br>
न देवत्वे ज्यायो विषयकलुषं केवलमदोऽ—<br>
निमेषं निःशेषं विफलयतु वा ध्यानशुभदृक् ॥५०॥

वृत्तिः—जिन !—भगवन् ! अर्हन् ! तव—भवतः । इमाम्—एताम् । मूर्तिस्फूर्तिम्—देहदीप्तिम् गतापायपटलम्—विनष्टविनाशव्यूहं यथा स्यात्तथा । द्रष्टुम्—साक्षात्कर्तुम् । नृणाम्—जनानाम् सततम्—अनिशम् । अनिमेषत्वम्—अनिमीलनम् । उचितम्—युक्तम्, सार्थकमिति यावत् । वा—पुनः । देवत्वे—देवभावे, सुरगताविति यावत् । विषयकलुषम्—स्रक्चन्दनाङ्गनादिविलासमलिनम् । केवलम्—निःशेषम् । अदः—इदम् अनिमेषत्वमितियावत् । ज्यायः—श्रेष्ठतमम्, समुचितमिति-यावत् । न—नहि । वा—पुनरप्यन्वेयम्, पुनश्च । ध्यानशुभदृक्—भवत्सन्मुखं बद्धासनो भूत्वा ध्यानमङ्गलदृष्टिर्मानवः । निःशेषम्—सकलम् । अनिमेषम्—देवम् । विफलयतु—निष्फलमापादयतु ॥५०॥

भवद् ध्यानस्नानप्रकृतिसुभगं मेऽस्तु हृदयं,<br>
पवित्रा चित्रा मे तव गरिमनुत्या भवतु गीः ।

प्रणामैः सच्छायस्तत्र भवतु कायश्च सततं,
त्वदेकस्वामित्वं समुदितविवेकं विजयताम् ॥५१॥

वृत्तिः—भगवन् पार्श्वनाथ ! मे—मम । हृदयम्—मानसम् । भवद्ध्यानस्नानप्रकृतिसुभगम्—भवतो ध्यानं चिन्तनमेव स्नानमभिषेकस्तेन प्रकृतिसुभगं निसर्गसुन्दरं तथा । अस्तु—जायताम् । तत्र—श्रीमतः । गरिमनुत्या—गौरवस्तुत्या । मे—मम । गीः—वाणी । पवित्रा—विशुद्धा चित्रा-अद्भुता । भवतु—अस्तु । च—पुनः । तत्र—भवतः । प्रणामैः-नमस्कारैः । कायः—देहः, ममेतिशेषः । सततम्—सदाकालम् । सच्छायः—लसद्द्युतिः, ललाम इतियावत् । भवतु-जायताम् । एवञ्च मनोवाक्कायानां भवदधीनत्वात् । मुदितविवेकम्—प्रसन्नविवेकविशिष्टम् । त्वदेकस्वामित्वम्—भवदनन्यनाथत्वम् । विजयताम्—सर्वोत्कर्षेण वर्तताम् ॥५१॥

अहीनत्वख्यातिं वहसि महसा पीनसुषमां,
क्षमां बिभ्रद् भूयः फणमणिघृणिध्वस्ततिमिरः ।
तथाप्येतच्चित्रं क्षणमपि न तृष्णाश्रयणकृन्-
न बाधो निर्बाधो वससि मितसिद्धीर्वितनुषे ॥५२॥

वृत्तिः—यद्यपि—उत्तरार्धेऽस्ति तथापीति तथा च पूर्वार्धे यद्यपीति अध्याहार्यम् । भूयःफणमणिघृणिध्वस्ततिमिरः—बहुतरनागराजमस्तकस्थमणिकिरणनिवाशितान्धकारः, पार्श्वप्रभोः सेवायै समागतस्य धरणपतेस्तथास्थितत्वात् सम्यगिदम्, शेषपक्षे तु स्पष्टमेव । भूयः इत्यस्य पृथगन्वये तु । भूयः—पुनश्च । महसा—तेजसा । पीनसुषमाम्—पुष्टविशिष्टशोभाशालिनीम् । क्षमाम्—क्षान्तिम्, धरित्रीञ्च । बिभ्रद्—

धारयन्, त्वमिति शेषः । **अहीनत्वख्यातिम्**—अहीनताप्रसिद्धिम्, उत्तमत्वविश्रुतिमिति यावत्, अहिनायकताख्यातिमिति तु शेषाश्रितम् । **वहसि**—धारयसि । **तथापि**—तदपि । **क्षणमपि**—स्वल्पकालमपि । **तृष्णाश्रयणाकृत्**—यथा शेषः सतृष्णस्तथा । **न**—नैव, विषाक्तत्वाद्-त्युष्णदेहत्वात्सश्रमत्वाच्च शेषस्य पिपासापरिकलितत्वमस्त्येव नास्ति तथा **ते**—सकलकषायमुक्तत्वादिति भावः । **निर्बाधः**—पीडापरित्यक्तः, भार-वाहकतया शेषस्यास्ति बाधा, तत्र तु नास्ति तथा च निर्बाधः सन्, त्वमितिशेषः । **अधः**—पाताले, हीनतायाञ्च । **न वा**—न च । **वसतिस्थितिं** विदधासि, शेषस्याधोवासस्तु प्रकट एव । **मितसिद्धीः**—प्रमाणितसिद्धीः । **वितनुषे**—ददासि । श्लेषानुप्राणितो व्यतिरेकः ॥५२॥

> गलत्पोषा दोषास्त्वयि गुणगणाः क्लृप्तशरणाः,
> गतक्षोभा शोभा हृदयमपि लोभादुपरतम् ।
> त्विषां पात्रं गात्रं वदनमतिलावण्यसदनं,
> तवाक्षुद्रा मुद्राऽमृतरमकिरः पर्षदि गिरः ॥५३॥

वृत्तिः—**त्वयि**—श्रीमति भवति । **दोषाः**—दूषणानि । **गलत्पोषाः**-पुष्टिरहिताः, असहाया इति यावत् । **गुणगणाः**—गुणसमुदयाः । **क्लृप्तशरणाः**—कृतसमाश्रयाः । **शोभा**—कान्तिः । **गतक्षोभा**-संक्षोभविरहिता, अक्षुब्धेतियावत् । **हृदयम्**—अन्तःकरणम् । **लोभादुपरतम्**—असंतोषतो विरतम्, शान्तमितियावत् । **गात्रम्**—शरीरम् । **त्विषाम्**—ज्योतिषाम्, प्रभाणामिति । **पात्रम्**—भाजनम्, आधार इति । **वदनम्**—मुखम् । **अतिलावण्यसदनम्**—समधिकसौन्दर्यविशेषगृहम् ! **तव**—श्रीमतः । **मुद्रा**—वहिर्देहसंस्थितिः । **अक्षुद्रा**—अतुच्छा, परमेतियावत्,

यदुक्तम्–‘वपुश्च पर्यङ्कशयं श्लथं च, दृशौ च नासानियते स्थिरे च। न शिक्षितेयं परतीर्थनाथै–र्जिनेन्द्र ! मुद्राऽपि तवान्यदास्ता’मिति। **पर्षदि**–सभायाम्, समवसरण इति। **गिरः**–वाचः। **अमृतरसकिरः**–सुधारसवर्षणशीलाः। सन्तीतिशेषः ॥५३॥

विना बाणैर्विश्वं जितमिह गुणैरेव भवता,
विना रागं चित्तं भुवनभविनां रञ्जितमपि।
विना मोहं मुग्धः श्रितबुध ! विनाङ्गीकृतशिवो,
विरूपाक्षाकारं विगलितविकारं विजयसे ॥५४॥

वृत्तिः—**श्रितबुध !**–समुपाश्रितप्राज्ञ ! **भवता**–त्वया। **इह**–लोकेऽत्र। **बाणैः**–शरैः। **विना**–अन्तरेण। **गुणैः**–शिञ्जिनीभिरिति विरोधः, ज्ञानादिगुणैरिति समाधिः, गुणशब्दस्यैतदर्थद्वयमतिव्यक्तमास्ते। **एव**–अवधारणे। **विश्वम्**–जगत्। **जितम्**–वशीकृतम्। **रागम्**–स्नेहम्। **विना**–अन्तरेण। **भुवनभविनाम्**–विश्वभव्यात्मनाम्। **चित्तम्**–हृदयम्। **रञ्जितम्**–अनुरञ्जितम्, भक्तिरागभरसम्भृतमापादितमिति यावत्। **अपि**–पुनः। **मोहम्**–अज्ञानम्, मोहनीयकर्म। **विना**–अन्तरेण। **मुग्धः**–मूढ इति विरोधः, रम्य इति तत्परिहारः, ‘मुग्धो मूढे रम्य’ इत्यनेकार्थः। **विरूपाक्षाकारम्**–विसदृशेन्द्रियाकृतिम्। **विना**–ऋते। **अङ्गीकृतशिवः**–अनङ्गमङ्गं सम्पद्यते तथाकृता शिवा पार्वती येन स, पक्षे अङ्गीकृतः शिवो मोक्षो येन तथा। **विगलितविकारम्**–विकारविरहितं यथास्यात्तथा। **विजयसे**–सर्वोत्कर्षेण वर्तसे। विनोक्तिः, सा च श्लेषानुप्राणिता ॥५४॥

गुणास्ते स्पर्धन्ते प्रसृमरशरच्चन्द्रनिकरान्,
कथं व्यक्तं रक्तं भवति हृदयं तैर्भवभृताम्।
कठोरं चेतस्ते यदपि कुलिशाद् घोरनियमे,
कथं विश्वे विश्वेश्वरवर! कृपाकोमलमदः ॥५५॥

वृत्तिः—विश्वेश्वरवर!—अयि भुवनाधिपप्रवर! ते—भवतः। गुणाः—ज्ञानादयो विशिष्टा गुणाः। प्रसृमरशरच्चन्द्रनिकरान्—प्रसरणशीलशारदशशिसङ्घातान्। स्पर्धन्ते—आह्वयन्ते, स्पर्धमाना भवन्तीति यावत्। तैः—पूर्ववर्णितैरुत्तमगुणैः कृत्वा। भवभृताम्—जगज्जनानाम्। हृदयम्—मानसम्। व्यक्तम्—स्पष्टम्। रक्तम्—लोहितम् विरोधाविर्भावकम्, अनुरक्तमिति तु यथावत्। कथम्—केन प्रकारेण। भवति—जायते। नहि शुभ्रवर्णसम्पादकसाधनतो रक्तता स्यात्तथापि तथाभूताद्गुणोच्चयाद् भवति तथा, तथा चाद्भुतमिदम्। यत्—बुद्धिविषयीभूतम्। ते—श्रीमतः। चेतः—चित्तम्। घोरनियमे—अतिकठिनाभिग्रहादिनियमे। कुलिशात्—वज्रात्। अपि—खलु। कठोरम्—कठिनम्, दृढमिति यावत्। अदः—एतादृशं भवच्चेतः। विश्वे—भुवने। कथम्—केन प्रकारेण। कृपाकोमलम्—करुणातो मृदुलम्, दयार्द्रम् इति यावत्। अस्तीतिशेषः। अपूर्वमहिमानस्ते गुणा अतिशयेन मृदु च भवतोऽन्तःकरणमिति भावः। विचित्रालङ्कारः ॥५५॥

मुनीनां ध्यानाब्धौ तव मुखविधोर्दर्शनरसात्,
तरङ्गैरिङ्गद्भिः प्रशमरससंज्ञैः प्रसृमरैः।
भृशं फेनायन्ते हत मदनसेना गुणगणा-
स्तवोच्चैः कैलासद्युतिमदभिदायां सुनिपुणाः ॥५६॥

वृत्तिः—तव—श्रीमतो भवतः । मुखविधोः—वदनचन्द्रमसः । दर्शनरसात्—अवलोकनजनितादानन्दविशेषात् । मुनीनाम्—श्रमणानाम् । ध्यानाब्धौ—ध्यानं परमात्मतत्त्वचिन्तनम् तदेवाब्धिः समुद्रस्तस्मिँस्तथा । इद्धैः—प्रेङ्खद्भिः । प्रसृमरैः—प्रसरणशीलैः । प्रशमरससंज्ञैः—शान्तभावाभिधानैः । तरङ्गैः—कल्लोलैः । ( करणैः ) हतमदनसेनाः—विनाशितानङ्गसेनाधिपानुचराः । तव—श्रीमतो भवतः । उच्चैः—उन्नताः । कैलासद्युतिमदभिदायाम्—हिमवतः कान्त्यभिमानस्य भेदने । सुनिपुणाः—अत्यन्तकुशलाः, ततोऽप्यधिकमुज्वलाः । गुणगणाः—गुणसमुदयाः । भृशम्—अधिकं यथा स्यात्तथा । फेनायन्ते—डिण्डीरायन्ते । अत्र मुनीनां ध्यानं वारिधिः भगवतो मुखं चन्द्रः, प्रशमरसप्रवाहास्तरङ्गाः, गुणाः फेनाः फीणेति भाषा प्रसिद्धाः । एतत्सर्वं मदनसेनापोषकमपि मदनं विमर्दयतीति चित्रम् । रूपकम् ॥५६॥

गुणास्ते ते हंसास्त्रिजगदवतंसायित ! चिरं,
भजन्ते ये ध्यानामृतरसभृतं मानसमदः ।
मिदां तन्वन्त्येते बत परयशोमौक्तिकगणैः,
कृताहारा स्फारा न किमु पयसोर्दोषगुणयोः ॥५७॥

वृत्तिः—त्रिजगदवतंसायित !—भुवनत्रयशिरोमुकुटभूत ! ते—भवतः । ते-अग्रे यच्छब्दबोध्यास्ते । गुणाः—ज्ञानप्रमुखाः । हंसाः—मरालाः, तद्रूपा इति यावत् । ये—गुणहंसा ये अदः—पुरोवर्ति । ध्यानामृतरसभृतम्—आत्मतत्त्वचिन्तनात्मकपीयूषरसपरिपूर्णम् । मानसम्—मनोऽभिन्नं मानससरः । चिरम्—बहोः कालात् । भजन्ते—

सेवन्ते । बत–हर्षे । परयशोमौक्तिकगणैः–परकीयवर्णवादमुक्ताफलकदम्बकैः । कृताहाराः–विहिताशनाः । स्फाराः–विपुलाः । एते–गुणराजहंसाः । पयसोः–जलदुग्धयोः, 'पयः क्षीरे च नीरे चे'त्यनेकार्थः । दोषगुणयोः–गुणावगुणयोः । भिदाम्–भेदम् । न–नहि । तन्वन्ति–विस्तारयन्ति । किमु ?–प्रश्नार्थकम्, अपि तु गुणदोषविवेकं विदधत्येव । रूपकम् ॥५७॥

[ अलोके लोके चापरिमितमनन्तं खमखिलं,
तवैकस्मिन् ज्ञाने विशति नियतं दर्पण इव ।
यदि ज्ञानं व्योम्नोऽप्यधिकतरमेकं तव ततो,
गुणानामानन्त्यं तुलयतु कथङ्कारमतुलम् ॥५८॥]

वृत्तिः—अलोके लोके च–सप्तम्या विषयत्वार्थकत्वाल्लोकालोकविषयम् । अपरिमितम्–परिमाणविरहितम् । अनन्तम्–असीमम् । अखिलम्–समस्तम् । खम्–आकाशम् । दर्पण इव–यथा मुकुरे, आदर्शवदिति यावत् । एकस्मिन्–केवले । तव–श्रीमतः पार्श्वनाथस्य भगवतः । ज्ञाने–केवलज्ञाने । नियतं–ध्रुवम् । विशति–सङ्क्रामति । यदि–चेत् । तव–भवतः । ज्ञानम्–केवलज्ञानम् । व्योम्नः–आकाशतः । अपि–खलु । अधिकतरम्–अधिकं महत् । ततः–तस्मात् । अतुलम्–अनुपमम् । गुणानाम् आनन्त्यम्–अनन्तगुणकदम्बकम् । कथङ्कारम्–केन प्रकारेण । तुलयतु–उपमिनोतु । जन इतिशेषः ॥५८॥

[मषीपात्रं चन्द्रः किरणनिचया लम्बतरले–
खनीरूपाः पत्रं क्षितितलमुडुर्लेखकचणः ।

गुणास्तेऽनन्तास्तत्त्वरणजनितौत्सुक्यवशतो,
विधोर्वक्रीभूतादजनि गगने किं सुरधुनी ॥५९॥]

वृत्तिः—चन्द्रः—चन्द्रमाः । मषीपात्रम्—मषीद्रव्यभाजनम् । किरणनिचयाः—तदीयांशुसमूहाः । लम्बतरलेखनीरूपाः—अतिदीर्घलेखनीस्वरूपाः । क्षितितलम्—अवनिपृष्ठम् । पत्रम्—लेखनाधारदलम् । उडुः—जात्येकवचनान्नक्षत्रगणः । लेखकचणः—कुशललेखकः । ते—तत्र भवतः पार्श्वप्रभोः । गुणाः—ज्ञानप्रभृतयः । अनन्ताः—पाररहिताः । तत्—तस्माद्धेतोः । त्वरणजनितौत्सुक्यवशतः—लेखनीयगुणानन्त्यप्रयोज्यत्वरोत्पादितोत्कतायत्तत्वात् । 'उत्क उत्सुक उन्मना' इत्यमरः । वक्रीभूतात्—अवक्रोऽकुटिलो वक्रः सम्पद्यते तथाभूतो वक्रीभूतस्तस्मात्तथा । विधोः—चन्द्रात् । गगने—नभसि । सुरधुनी—आकाशगङ्गा । अजनि—जाता । किम्—उत्प्रेक्षायाम् । रूपकानुप्राणितोत्प्रेक्षा-अयं भावः यथा लेखनकार्यमत्यधिकं भवेत् तदा लेखकस्त्वरते, त्वरावशान्मषीपात्रं वक्रं भवति ततश्च मषी अधः पतति, तदेवोपरिष्टादुत्प्रेक्षितमास्त इति ॥५९॥

[ गुणा स्थैर्यं प्राप्तास्त्वयि पुनरमो अत्र सततं,
भ्रमन्ति त्रैलोक्यं जनितुमवदातं किमु परम् ।
गुणाद् गौणोत्पत्तिर्विदितविदिता साऽपि वितथा,
गुणास्ते गौणं नो विदधति यतः क्वापि भगवन् ॥६०॥ ]

वृत्तिः—अत्र—अस्मिन् काले लोके च । त्वयि—श्रीमति । स्थैर्यम्—स्थिरताम् । प्राप्ताः—समधिगताः । अमो—ते । गुणाः—ज्ञाना-

दयः । पुनः—वाक्यालङ्कारे । सततम्—निरन्तरम् । त्रैलोक्यम्—भुवनत्रयम् । अवदातम्—शुभ्रम् । जनितुम्—कर्तुम् । परम्—विशिष्टं यथास्यात्तथा । भ्रमन्ति—विचरन्ति । किमु—किम्, प्रश्ने । विदितविदिताः—ज्ञातज्ञाताः । सा—प्रसिद्धा । गुणात्—गुणनाम्नः । गौणोत्पत्तिः—गुणस्यायमिति गौणनाम्नो गौणस्य जनिः । अपि—खलु । वितथा—असत्या । भवतीति शेषः । यतः—यस्मात् । भगवन् !—प्रभो पार्श्वनाथ ! ते—भवतः । गुणाः—ज्ञानादयः । क्वापि—कुत्रचिदपि । गौणम्—अमुख्यभावम् । नो—नैव । विदधति—कुर्वन्ति । विरोधाभासः ॥६०॥

[ परेषां दोषाणां भवति परिणामो गुणतया,
गुणानां ते कामं परसदसि दोषात्मकतया ।
तव ध्यानं शुभ्रं धवलयति किं दोषनिकरं,
गुणग्रामं तेषां मलिनयति दुर्ध्यानमथवा ॥६१॥ ]

वृत्तिः—परेषाम्—अन्यतीर्थिकसम्बन्धिनाम् । दोषाणाम्—दूषणानाम् । भवति—तत्रभवति श्रीमति त्वयि । गुणतया—गुणरूपतया । परिणामः—परिणमनम् भवतीति शेषः । परे ये स्नेहाभावविश्वविधातृत्वाभावप्रमुखं दूषणत्वेन प्रतिपादयन्ति तदेव तव गुणात्मकतया परिणमते । ते—तव । गुणानाम्—भवविरक्तत्वादीनाम् । परसदसि—अन्यतीर्थिकसदने । कामम्—पर्याप्तम् । 'कामं प्रकामं पर्याप्तं निकामेष्टं यथेप्सिते' ६।१४। इत्यभिधानः । दोषात्मकतया—दूषणात्मना । परिणामो भवतीति शेषः । तव—भवतः । शुभ्रम्—शुक्लम् । ध्यानम्—चिन्तनम् । दोषनिकरम्—दूषणसमूहम् । धवलयति—शुभ्रीकरोति । किम् !—सम्भावनायाम् । अथवा—उत, पक्षान्तरे । तेषाम्—परदर्शनि-

नाम् । **दुर्ध्यानम्**—दुष्टविचिन्तनम्, आर्तरौद्रादि । **गुणग्रामम्**—गुणगणम् । **मलिनयति**—मलिनीयति, दूषयतीति यावत् । किमिति शेषः ॥६१॥

[ प्रदेशाः सङ्ख्याया विषयमतियातास्तदपि ते,
गुणानामानन्त्यं कथमिह वसेत्तर्कय मनाक् ।
त्वयैकस्मिन्नंशे निहितमखिलं प्रेक्ष्य भवतो,
न लक्ष्यं वैलक्ष्यं भवति विबुधानामपि धियः ॥६२॥ ]

वृत्तिः—**प्रदेशाः**—आत्मप्रदेशाः, अपरिच्छेद्यो जीवसम्बद्धस्तदीयो विभागः प्रदेशः । **सङ्ख्यायाः**—गणनायाः । **विषयम्**—गोचरम् । **अतियाताः**—अतिक्रान्ताः, असङ्ख्याता इति यावत् । **तदपि**—तथापि । **ते**—तव । **गुणानाम्**—ज्ञानादीनाम् । **आनन्त्यम्**—अनन्तत्वम् । **इह**—असङ्ख्यप्रदेशेषु । **कथम्**—केन प्रकारेण । **वसेत्**—अवतिष्ठेत । **मनाक्**—ईषत् **तर्कय**—विचारय । नहि अल्पाधारे महद्वस्तु तिष्ठति । असङ्ख्येयतोऽनन्तस्याधिक्यं स्पष्टमेव । **त्वया**—भवता । **एकस्मिन् अंशे**—एकात्मप्रदेश एव । **अखिलम्**—समस्तम्, गुणानन्त्यमिति शेषः । **निहितम्**—स्थापितम्, भवदेकात्मप्रदेशेऽपि सन्ति गुणा अनन्ता इति भावः । **प्रेक्ष्य**—अवलोक्य । **भवतः**—पार्श्वप्रभोस्ते । **वैलक्ष्यम्**—वैचित्र्यम्, अद्भुतमिति यावत् । **विबुधानाम्**—विदुषाम् । **अपि**—खलु । **धियः**—मतेः । **लक्ष्यम्**—ग्राह्यम्, गोचरम् । **न**—नहि । **भवति**—जायते ।

अत्र यत्तदोर्नित्यसम्बन्धात्तदपीत्यतः पूर्वं यद्यपीत्यस्य पदस्यानुपादानाद्विधेयाविमर्शो नाशङ्कनीयः, यच्छब्दार्थप्रतीतिसम्भवे तदनुपादानस्यापि दर्शनात्, अतएव 'युष्मदस्मत्प्रत्ययगोचरयो'रित्यादिना यद्यपी—

त्येतच्छब्दमन्तर्भाव्यापि पूर्वपक्षमुपक्षिप्य तथापीत्यादिना समाधानस्य ब्रह्मसूत्रशाङ्करभाष्ये दर्शनादिति ॥६२॥

विधिः कारं कारं गणयति नु रेखास्तव गुणान्,
सुधाबिन्दोरिन्दोर्वियति विततास्तारकमिषाः ।
प्रतिश्यामायामान् व्रजति न विलासोऽस्य निधनं,
ततो रिक्ते चन्द्रे पुनरपि निधत्तेऽमृतरसम् ॥६३॥

वृत्तिः—विधिः—विधाता । इन्दोः—सुधाधाम्नश्चन्द्रस्य । सुधाबिन्दोः—अमृतबिन्दूनाम्, तत्सम्बन्धिनोरितियावत्, मूल-एकवचनं जातिविवक्षायाः । तारकमिषाः—ताराव्याजाः । विततः—विस्तृताः । रेखाः—लेखाः, गणनाचिह्नानीतियावत् । कारं कारम्—कृत्वा कृत्वा । तव—भवतः । गुणान्—ज्ञानादिकान् । गणयति नु-सङ्ख्याति किमु । श्यामायामान्—रात्रिप्रहरान् । प्रति—लक्ष्यीकृत्य । अस्य—विधातुः । विलासः—गुणगणगणनात्मको विभ्रमः । निधनम्—अन्तम्, विराममिति यावत् । न—नैव । व्रजति—गच्छति । ततः—तस्मात् कारणात्, तदनन्तरं वा । रिक्ते—शून्ये, अमृतबिन्दुविरहित इति । चन्द्रे—सुधानिधौ । पुनरपि—भूयोऽपि । अमृतभरम्—प्रभूतममृतम् । निधत्ते—स्थापयति । उत्प्रेक्षा ॥६३॥

महो राहोर्नाहो मलिनमलिपङ्क्तिश्च धवला,
बलाकामाकारा द्विकवृकपिकानामनुसृताः ।
न शैला कैलाशा इव किमभवन्नञ्जनमुखा,
भृशं विश्वं विश्वं सितयति भवत्कीर्तिनिकरे ॥६४॥

वृत्तिः—भवत्कीर्तिनिकरे—भवदीययशःपुञ्जे । विश्वम्-सम-

स्तम् । विश्वम्—जगत् । भृशम्—अतिशयेन । सितयति—धवलयति सतीतिशेषः । अहो !—अद्भुतम् । राहोः—स्वर्भानोः । महः—प्रभा । मलिनम्—श्यामत्वम् । न—नहि । तमोरूपो राहुरपि धवलो जात इति, अग्रेऽप्येवमेव । च—पुनः । अलिपङ्क्तिः—भ्रमरराजी । धवला—श्वेता । द्विकवृकपिकानाम्—द्विकः, काकः, वृकः—अरण्यश्वा, पिकः—कोकिलस्तेषाम्, एते श्यामवर्णाः । आकाराः—स्वरूपाणि । बलाकाम्—बकपङ्क्तिम् । अनुसृताः—अनुगताः । अञ्जनमुखाः—अञ्जनगिरिप्रभृतयः । शैलाः—पर्वताः । कैलाशाः—रजताद्रयः । इव—यथा । किम्—किमु, प्रश्ने । न—नहि । अभवन्—समजनिषत, अपि त्वभवन्नेवेति भावः ॥६४॥

यशोभिस्तेऽशोभि त्रिजगदतिशुभ्रैर्भृशमित-
स्तिथिः सा का राका तिथिरिह न या हन्त ! भवति ।
कुहूर्नाम्नैवातः पिकवदनमातत्य शरणं,
श्रिता साक्षादेषा परवदनवेषा विलसति ॥६५॥

वृत्तिः—अतिशुभ्रैः—विशदविशदैः । ते—भवतः । यशोभिः—वर्णवादैः । त्रिजगत्—भुवनत्रयम् । भृशम्—अत्यर्थम् । अशोभि—शोभामलम्भि । इतः—अस्माद्धेतोः । सा—बुद्धिविषया । तिथिः—प्रतिपदादिः । का ? या तिथिः । इह—अत्र लोके । हन्त !—हर्षे । राका—पूर्णिमाः । न भवति—न जायते । अपि तु सर्वा तिथी राकैव भवतीतिभावः । कुहूः—अमावास्या । नाम्नैव—नाममात्रेणैव । साऽपि शुभ्रा सञ्जातेतिभावः । अतः—अस्मात् । पिकवदनम्—कोकिलाननम् । आतत्य—विस्तार्य्य । शरणम्—रक्षणम्, रक्षकं वा । श्रिता—समधिगता ।

एषा—कुहूरसौ । परवदनवेषा—परकीयाननेपथ्या । सतीतिशेषः । साक्षात्—प्रत्यक्षं यथास्यात्तथा । विलसति—विलासं विधत्ते । उत्प्रेक्षा-लङ्कारध्वनिः ॥६५॥

यशोदुग्धाम्भोधौ भवति तव मीनाकृति नभो,
ध्रुवं स्फारास्तारा जलकणतुलामीश ! दधते ।
किमावर्तः श्वभ्रं गिरिशगिरिगौरीशशशभृत्-
त्रिपिण्डी डिण्डीरद्युतिमुपगता नास्ति किमिह ॥६६॥

वृत्तिः—ईश !—अयि परमात्मन्! । तव—भवतः । यशोदुग्धा-म्भोधौ—यशःक्षीरसमुद्रे । नभः—गगनम् । मीनाकृति—मत्स्याकारम् । भवति—जायते । स्फाराः—विपुलाः । ताराः—तारकाः । ध्रुवम्—निश्चितम् । जलकणतुलाम्—सलिलबिन्दूपमाम् । दधते—धारयन्ति । श्वभ्रम्—पातालम् । आवर्तः—जलभ्रमः । किम् !—सम्भावनायाम् । गिरिशगिरि-गौरीश-शशभृत्त्रिपिण्डी—गिरिशः शिवस्तस्य गिरिः हिमा-चलः, गौरीशः महादेवः शशभृत शशी तेषां त्रिपिण्डी त्रितयी । डिण्डीरद्युतिम्—फेनकान्तिम् । इह—समुद्रेऽस्मिन् । न—नहि । उपगता—अवाप्ता । अस्ति—भवति । किम्—प्रश्ने । अपि तु उपगतैवेतिभावः॥६६॥

प्रयागेऽस्मिन् विश्वे प्रसरति भवत्कीर्तिरनिशं,
रसैस्तुङ्गा गङ्गा गिरिशगिरिशीतांशुविशदा ।
परेषां निःशेषा जिनवर ! कुकीर्तिश्च यमुना,
घनाम्भोदश्यामा ननु महसहस्राऽपतदिह ॥६७॥

वृत्तिः—जिनवर !—जिनेश्वर ! । अस्मिन्—अत्र । विश्वे—विश्वात्मके । प्रयागे—गङ्गायमुनासङ्गमस्तुते विश्रुते तीर्थे । भवत्कीर्तिः—

भवदीयकीर्तिरूपा । गिरिशगिरिशीतांशुविशदा–हिमालयहिमकरोज्ज्वला । रसैः–जलैः, सहृदयहृदयवेद्यैश्च । तुङ्गा–अत्युच्चा । गङ्गा–मन्दाकिनी । च–पुनः । परेषाम्–अन्यतीर्थिकानाम् । निःशेषा–समस्ता । कुकीर्तिः–अपकीर्तिरूपा । घनाम्भोदश्यामा–सान्द्रनीरदमलिना । यमुना–कालिन्दी । प्रसरति–विस्तरति, विस्तृता भवतीत्यर्थः । ननु–खलु । इह–गङ्गायमनयोर्मध्ये । महमहस्रा–तेजोऽतिशयपरिकरिता । सरस्वतीति यावत् । अपतत्–समापतिता । गङ्गेव निर्मला भवतां कीर्तिर्यमुनावच्छ्यामला च परेषां कुकीर्तिरिति भावः ॥६७॥

[ पुरा नो संप्राप्तं प्रवहणसमं ते प्रवचनं,
मनः प्राप्येदानीं कपिचपलतां कारयति माम् ।
ततः किं भावीति प्रभवति न निर्यामकवरे,
भवे चिन्ता चिन्तामणिसमधिके नाथ! नियतम् ॥६८॥ ]

वृत्तिः—पुरा–पूर्वम् । प्रवहणसमम्–बृहत्पोतसदृशम् । ते–तव श्रीमतः पार्श्वप्रभोः । प्रवचनम्–शासनम् । नो–नहि । सम्प्राप्तम्–समधिगतम् । मयेति शेषः । इदानीम्–अधुना । प्राप्य–लब्ध्वा । तादृशभवदीयशासनमित्यर्थतो लभ्यम् । स्थितमिति शेषः । माम्–मल्लक्षणं जनम् । मनः–अन्तःकरणम् । कर्तृ । कपिचपलताम्–वानरचापल्यम् । कारयति–सम्पादयति । नाथ !–भगवन् ! पार्श्वनाथ ! नियतम्–ध्रुवम् । चिन्तामणिसमधिके–चिन्तारत्नतोऽप्यधिकवैशिष्ट्यशालिनि । निर्यामकवरे–पोतवाहश्रेष्ठे । प्रभवति–सम्पद्यमाने, सतीतिशेषः । ततः–मनश्चञ्चलतासम्पादनानन्तरम्, मनश्चपलताया वा ।

भवे—संसारे। किंभावीति—किं भविष्यतीति। चिन्ता—विमर्शः। न—नहि। (प्रभवति)सञ्जायते। ममेति शेषः ॥६८॥

[ निकारं पर्याप्तं त्वरितमयितो रागनिकरः,
करेऽहं तस्यागां व्यथयति स मां रोषवशतः।
तत्राऽहं त्वं मे तद् विदितमथ नाथ! त्वमवता—
न्न चेत्ते महात्म्यं कथमवितथं स्थास्यति ततः ॥६९॥ ]

वृत्तिः—रागनिकरः—मात्सर्य्यानुरागव्रातः। 'रागोऽनुरागे मात्सर्य्ये, क्लेशादौ लोहितादिषु' इति शाश्वतः। त्वरितम्—द्रुतम्। पर्याप्तम्—प्रकामम्। 'कामं प्रकामं पर्याप्तं, निकामेष्टे यथेप्सिते' इत्यभिधानः। निकारम्—तिरस्कारम्। 'न्यक्कारस्तु तिरस्क्रिया, अत्याकारो निकारश्च' इत्यभिधानः। अयितः—प्रापितः। अन्तर्भावितणिगर्थत्वात्। त्वया भगवता पार्श्वनाथेनेतिशेषः। अहम्—भवदनुसरणस्वभावः। तस्य—रागनिकरस्य। करे—हस्ते। आगाम्—आयातः। तदीयकरपतित इति यावत्। रोषवशतः—क्रोधायत्तत्वात्, क्रोधपरवशः इत्यर्थः। सः—रागनिकरः। माम्—मल्लक्षणम्। व्यथयति—पीडयति। अहम्। तत्र—अस्मीति शेषः। त्वम् मे—असीति शेषः। तत्—एतत्। विदितम्—विश्वविश्रुतम्। अथ—अनन्तरम्, अव्ययानामनेकार्थत्वादधुना वा। नाथ!—भगवन्! त्वम्। मातीति शेषः। अवतात्—रक्षतात्। चेत्—यदि। न—नहि। रक्षसीति शेषः। ततः—तदा। ते—तव। माहात्म्यम्—महत्वम्। अवितथम्—यथार्थम्, सत्यमिति यावत्। कथम्—केन प्रकारेण। स्थास्यति—स्थिरीभविष्यति, अपि तु नैव स्थास्यतीतिभावः ॥६९॥

[ प्रभो ! ते दासानां गणितिरिह नास्ते मम पुन–
स्त्वमेवैको नाथः कमपरमहं वच्मि हृदयम् ।
त्यजौदासीन्यं तद्धर हर मदीयां मलिनतां,
त्वदीयं सान्निध्यं नय नय परं मां भववनात् ॥७०॥

वृत्तिः—प्रभो !–नाथ ! । इह–लोकेऽस्मिन् । ते–तव । दासानाम्–किङ्कराणाम्, सेवकानामिति यावत् । गणितिः–गणना, सङ्ख्येतियावत् । न–नैव । आस्ते–अस्ति । अगणितास्ते दासाः सन्तीति यावत् । मम–मल्लक्षणस्य जनस्य । पुनः–तु । एकः–केवलम् । त्वम्–भवान् । एव–अवधारणे । नाथः–स्वामी । अहम्–भवद्दासः । अपरम्–मुक्त्वा भवन्तमन्यम् । कम् । हृदयम्–हृदयाभिप्रायम् । वच्मि–ब्रवीमि । तत्–तस्मात् । औदासीन्यम्–उदासीनताम्, उपेक्षामितियावत् । त्यज–दूरीकुरु । मदीयाम्–मत्सम्बन्धिनीम् । मलिनताम्–दोषाविलताम् । हर हर–भूयोभूयः क्षालय । माम्–मल्लक्षणम् । भववनात्–संसाराटवितः । परम्–उत्कृष्टम् । त्वदीयम्–भवदीयम् । सान्निध्यम्–सन्निधानम्, सामीप्यमितियावत् । नय नय–नूनं प्रापय । अत्र श्लोके वच्–नीधातोर्द्विकर्मकतया तथा तथा प्रयोगोऽनुसन्धेयः ॥७०॥

[ 'शठे शाठ्यं' नीतिस्तदपि कमठे कर्मठमठे,
हठात् कष्टं स्पष्टं वितरति निकृष्टेऽधमतमे ।
त्वया दृष्ट्या दिष्ट्या प्रशममयितं तस्य दुरितं,
परात्मा दुष्टात्मा क्वचन न नूनं प्रभवति ॥७१॥ ]

वृत्तिः—शठे–धूर्ते, खले इति यावत् । शाठ्यम्–धूर्तता । विधेयेति नीतिः–नयः । 'व्रजन्ति ते मूढधियः पराभवं, भवन्ति

मायाविषु ये न मायिनः । प्रविश्य हि घ्नन्ति शठास्तथाविधा-नसंवृताङ्गान्निशिता इवेषवः' इति किरातार्जुनीयपद्यस्मरणात् । अस्ति, यद्यपीतिशेषः । तदपि—तथापि । हठात्—प्रसह्य । स्पष्टम्—प्रकटम् । कष्टम्—दुःखम् । वितरति—ददाति । निकृष्टे—नीचे । अधमतमे—अतिशयाधमे । कर्मठमठे—कष्टक्रियानुष्ठानानां मठावासे, तत्स्वरूपे । कमठे—तदभिधानप्रसिद्धे तापसे । त्वया—भवता, पार्श्वनाथेन । दृष्ट्या—अवलोकनेन । दिष्ट्या—सम्मदतः । 'दिष्ट्या तु सम्मदे' इत्यभिधानः । तस्य—कमठस्य । दुरितम्—दुष्कृतम् । प्रशमम्—शान्तिम् । अयितम्—गमितम् । अन्तर्भावितणिगर्थत्वात् । समर्थयत्यर्थान्तरन्यासेन परात्मे-त्यादिना । परात्मा—परमात्मा । कुहचन—कुत्रापि । नूनम्—निश्चयेन । दुष्टात्मा—दुर्जनः । न—नैव । प्रभवति—सञ्जायते । अर्थान्तरन्यासः॥७१॥

[ प्रियङ्गूणां रूपं मरकतमणीनामपि पुनः,
स्वरूपं ते स्वामिन् ! कथमपि न च स्पर्धितुमलम् ।
यतो लोके नीलं परमरमणीयाणुमहितं,
न रूपं तेऽन्यस्मिन् क्वचिदपि हि दृष्टं श्रुतमपि ॥७२॥ ]

वृत्तिः—स्वामिन् !—पार्श्वप्रभो ! प्रियङ्गूणाम्—फलिनीनाम्, 'प्रियङ्गुः फलिनी श्यामा' इत्यभिधानः । पुनः—अथ । मरकतमणीनाम्—गारुत्मतरत्नानाम्, 'नीलमे'तिभाषायाम् । अपि—सम्भावनायाम् । रूपम्—वर्णः । ते—भवतः । स्वरूपम्—शरीरकान्तिम् । कथमपि—केनापि प्रकारेण । स्पर्धितुम्—संघर्षितुम् । न च—नहि । अलम्—समर्थम् । यतः—यस्मात् । लोके—जगति । परमरमणीयाणुमहितम्—सर्वातिशायिहारिपरमाणुसमाश्रितम् । नीलम्—नीलवर्णम् । ते—तव ।

रूपम्—स्वरूपम् । अन्यस्मिन्—भवद्भिन्ने । क्वचित्—कचन । अपि—समुच्चये । हि—निश्चयेन । न—नैव । दृष्टम्—वीक्षितम् । श्रुतम्—आकर्णितम् । अपि—सम्भावनायाम् ॥७२॥

[ प्रभो ! श्लोके कस्मिँश्चिदपि परिमाणं परिगता,
यतो वर्णा वर्णो न विशति तवैकोऽपि भुवने ।
अतः श्लोकैर्नो ते चरितममलं श्लोकितुमलं,
ततस्त्वां योगीन्द्रा विदधतितरां ध्यानविषयम् ॥७३॥

वृत्तिः—प्रभो !—भगवन् ! यतः—यस्मात् कारणात् । कस्मिँश्चित्—यत्र कुत्रचिदपि । अपि—खलु । श्लोके—पद्ये । वर्णाः—अक्षराणि । परिमाणं परिगताः—मानमिताः, परिमिता इति यावत् । तव—प्रभोस्ते पार्श्वनाथस्य । एकः-अद्वितीयः । अपि-पुनः । वर्णः—यशः । भुवने—सकले विश्वे । न विशति—नैव माति । अतः—अस्माद् हेतोः । श्लोकैः—नियत-वर्णमात्राकपद्यैः । ते—तव परमात्मनः । अमलम्—पवित्रम् । चरितम्—सद्वृत्तम् । श्लोकितुम्—प्रशंसितुम् । नो—नैव । अलम्—समर्थाः । ततः—तस्मात् । योगीन्द्राः—मुनिप्रवराः । त्वाम्—भवन्तं पार्श्वभगवन्तम् । ध्यानविषयम्—समाधिगोचरम् । विदधति तराम्-सविशेषं कुर्वन्ति॥७३॥

[ मनस्ते पादाब्जं मम सुकृततश्चेत् क्षणमपि,
प्रभो ! सम्प्राप्तं तन्ननु मयि विधेयाऽतनुकृपा ।
निधेयं नो याम्यं नयनमिह देयं तदितर—
न्न भव्यानां भव्यार्थनविघटनं क्वापि भवति ॥७४॥ ]

वृत्तिः—प्रभो !—अयि पार्श्वजिनेश्वर ! । मम—मल्लक्षणस्य

जनस्य । **मनः**—स्वान्तम् । **सुकृततः**—सद्भाग्यवशतः । **चेत्**—यदि । **क्षणमपि**—निमेषप्रमाणकालमभिव्याप्यापि । **ते**—तव । **पादाब्जम्**—चरणकमलम् । **सम्प्राप्तम्**—अधिगतम्, स्यादिति शेषः । **तत्**—तर्हि, तदा वा । **ननु**—निश्चयेन । **मयि**—मल्लक्षणे जने । **अतनुकृपा**—महती दया । **विधेया**—करणीया । **इह**—अस्मिन्, भवत्पादाब्जे इति यावत् । **याम्यम्**—दक्षिणम् । **नयनम्**—नेत्रम्, सूर्य्यात्मकमिति भावः । **नो**—नैव । **निधेयम्**—संस्थाप्यम्, किन्तु । **तदितरत्**—दक्षिणान्यत्, वाममितियावत् । चन्द्रात्मकमितिभावः । अर्थान्तरन्यासेन समर्थयति भव्यानामित्यादि । **भव्यानाम्**- भव्यात्मनाम् । **भव्यार्थनविघटनम्**—समुचितयाचनावैफल्यम् । **क्वापि**—कुत्रापि । **न**—नहि । **भवति**—जायते । अयमाशयः, भानोः करसम्पर्कतः कमलं विकसति, सङ्कोचमञ्चति च चन्द्रमरीचिसम्बन्धात् एवञ्च पादाब्जगतमनोद्विरेफश्चेत् तत्र दक्षिणेक्षणपातः स्यात्तदा चरणाब्जविकासात् समुड्डीयेत्, वामनेत्रसम्पर्कतः सम्मीलनात्तस्य न स्यादुडयनमपि तु तत्रैव स्थिरो भूत्वा तिष्ठेत् इति।।७४।।

[ भवान् भानुर्भूत्वा हृदयकमलं स्मेरयतु मे,
द्विरेफः पर्याप्तं तदनु वसतिं तत्र कुरुतात् ।
सुधांशुः सन्नस्मिन् किरणनिकरैर्वर्षतु ततो,
न याचे त्वामन्यत् किमपि भगवन् ! भक्त्यधिकृतेः ।।७५।। ]

वृत्तिः—**भगवन् !**—पार्श्वप्रभो ! **भवान्**—श्रीमान् । **भानुः**—सूर्य्यः । **भूत्वा**—सम्पद्य । **मे**—मम, भवद्दासस्य । **हृदयकमलम्**—मानसपद्मम् । **स्मेरयतु**—स्मेरं करोतु, प्रफुल्लयत्विति यावत् । **तदनु**—तदनन्तरम् । **द्विरेफः**—भ्रमरः सन् । **पर्याप्तम्**—निकामम् । **तत्र**—

हृदयकमले। वसतिम्—वासम्। कुरुतात्—विधत्ताम्। ततः—तदनन्तरम्। सुधांशुः—चन्द्रः। सन्—भवन्। अस्मिन्—कमलेऽत्र। किरणनिकरैः—करकदम्बैः। वर्षतु—सिञ्चतु। भक्त्यधिकृतेः—भक्त्यधिकारात्। त्वाम्—भवन्तम्। किमपि अन्यत्—उक्तातिरिक्तं किञ्चिदपि। न—न खलु। याचे—मार्गयामि ॥७५॥

[ प्रभाते तिग्मांशोरपनयति तारास्ततविभा,
प्रभा ते स्याद्वादिन्! विशदयति सर्वा मुनिततीः।
स चाम्भोजं यद्वद्विकचयति नैवं कुवलयं,
भवान् भव्याम्भोजं कुवलयमपि प्रौढमहिमा ॥७६॥ ]

वृत्तिः—तिग्मांशोः—तिग्मस्तीक्ष्णोंऽशुः किरणो यस्य स तिग्मांशुः सूर्यस्तस्य तथा। ततविभा—प्राप्तविस्तारप्रभा। प्रभाते—प्रातःकाले। ताराः—नक्षत्राणि। अपनयति—दूरीकरोति, विच्छाययतीति—यावत्। स्याद्वादिन्!—जिनवर! ते—तव। प्रभा—स्फुरद्रूपकान्तिः। सर्वाः—निखिलाः। मुनिततीः—साधुश्रेणीः। विशदयति—विकासयति। च—पुनः। सः—बुद्धिविषयीभूतस्तिग्मांशुः। यद्वत्—यथा। अम्भोजम्—कमलम्। विकचयति—प्रफुल्लयति। एवम्—तथा। कुवलयम्—कुमुदम्। न—नहि। विकचयतीति शेषः। प्रौढमहिमा—प्रकटप्रभावः। भवान्—श्रीमान् पार्श्वप्रभुः। भव्याम्भोजम्—भविककमलम्। कुवलयम्—भूमण्डलम्। अपि—समुच्चये। समतयैव विकचयतीति भावः। व्यतिरेकः ॥७६॥

[ भवान् नीलः कामं सकलभुवि वर्णेन विदित,—
स्तथापि त्रैलोक्यं धवलयति वर्णो भगवतः।

न चित्रं तच्चित्रं किमपि यदवर्णः समजनि,
प्रभूणां वैचित्र्यं भवति जगदाश्चर्यजननम् ॥७७॥ ]

वृत्तिः—भवान्—भगवान् पार्श्वनाथः । सकलभुवि—समस्त-जगति,लोकत्रयेऽपीति यावत् । कामम्—पर्य्याप्तं यथास्यात्तथा । वर्णेन-रूपेण कृत्वा । नीलः—नीलत्वगुणवान् । विदितः—विश्रुतः । तथापि-नीलवर्णतया प्रसिद्धौ सत्यामपि । भगवतः-षड्विधैश्वर्य्यशालिनः श्रीमतः । वर्णः—यशः । त्रैलोक्यम्—भुवनत्रयम् । धवलयति—शुभ्रयति । तत्-भवदीयवर्णकर्तृकजगत्त्रितयधवलीकरणम् । चित्रम्—आश्चर्यम् । न-नहि । यत्—यतश्च । अवर्णः—अरूपः । समजनि—अभूत् । तत्-अवर्णभवनम् । किमपि—किञ्चित् । चित्रम्—अद्भुतम् । अर्थान्तर-न्यासेन समर्थयति प्रभूणामित्यादि । प्रभूणाम्—ईश्वराणाम् । वैचित्र्यम्-वैलक्षण्यम्, वैशिष्ट्यमिति यावत् । जगदाश्चर्यजननम्—विश्वविस्मया-पादकम् । भवति—जायते । विरोधः ॥७७॥

[ श्रुतः श्रीमानाप्तैरिह जगति भव्येष्वभयदो,
जनोऽयं चेद्भव्यः किमिति न भयाद् दूरमयितः ।
अभव्यः कामं त्वत्पदकमलमाप्तो न भविता,
भयं हृत्वाऽभिख्यामुपनयतु पूर्णार्थललिताम् ॥७८॥ ]

वृत्तिः—श्रीमान्—शोभातिशयसम्पन्नः, पार्श्वनाथः । आप्तैः—यथार्थवक्तृभिः, सज्जनैरिति यावत् । इह—अस्मिन् । जगति—लोके । भव्येषु—भविकजनेषु, तद्विषय इति यावत् । अभयदः—अभयदानदाता । श्रुतः—प्रसिद्धः । अयम् समीपवर्ती । जनः—मल्लक्षणः । चेत्—यदि ।

**भव्यः**—मोक्षगमनयोग्यतावान्। तदा, **किमिति**—कथम्, किंकारणमिति। **भयात्**—भवभीतितः। **दूरम्**—विप्रकृष्टम्। **न**—न खलु। **अयितः**—गमितः प्रापितः, अन्तर्भावितणिगर्थोऽयं प्रयोगः। चेत्, **अभव्यः**—अभविकः, तर्हि। **कामम्**—बाढम्। **त्वत्पदकमलम्**—भवदीयचरणारविन्दम्। **आप्तः**—अधिगतः। **न**—नहि। **भविता**—भविष्यति। अयं जन इति शेषः। अतः, **भयम्**—मम साध्वसम्। **हृत्वा**—अपहृत्य। **अभिख्याम्**—स्वाभिधानम्, अभयद इतिरूपम्। **पूर्णार्थललिताम्**—परिपूर्णार्थसमर्थिताम्। सर्वाङ्गसम्पूर्णामितियावत्। **उपनयतु**—प्रापयतु। अयमाशयः, अभयदः श्रीमान यावन्मम भयं नापहरिष्यति तावत् भवतस्तन्नाम नावच्छेदकावच्छेदेन चरितार्थं भविष्यति इति ॥७८॥

[ मया नर्तं नर्तं सुचिरमभिनीतं तव पुरः,
प्रसन्नश्चेत्तूर्णं वितरतु मदिष्टं वितरणम्।
न चेद् दूरीकार्यो भवजवनिकातः सकृदहं,
मुनिप्रासादाद्यन्नृपतिरिव संपश्यति भवान् ॥७९॥ ]

वृत्तिः—**मया**—मल्लक्षणेन जनेन। **सुचिरम्**—अतिचिरकालात्। **नर्तं नर्तम्**—वारंवारं नृत्यं विधाय। **तव**—भवतः। **पुरः**—अग्रे। **अभिनीतम्**—अभिनयः कृतः। **चेत्**—यदि। **प्रसन्नः**—हृष्टः। भवानिति दृष्ट्वेति च शेषः। तदा, **तूर्णम्**—अविलम्बितम्। **मदिष्टम्**—मदभिलषितम्। **वितरणम्**—दानम्, अर्थान्निःश्रेयसम्। **वितरतु**—प्रयच्छतु। **चेत्**—यदि। **न**—नहि। प्रसन्न इति शेषः, तदा। **भवजवनिकातः**—संसारप्रतिसीरातः, 'प्रतिसीरा जवनिके'त्यमरः। **सकृत्**—एकवारमपि। **अहम्**—भवदभिमुखमभिनेता। **दूरीकार्यः**—अयोग्योऽयमिति कृत्वा निःसारणीयः। जव-

निकापसारितानां न नटनसम्भव इतिभावः । यत्–यस्मात् । भवान्–श्रीमान् । मुनिप्रासादात्–सप्तमभवनमारुह्य स्थितः,इतः सप्तराजलोकोक्षमोक्षपदगत इति यावत् । नृपतिः–राजराजेश्वरः । इव–यथा । सम्पश्यति–प्रेक्षते । उपमोत्प्रेक्षे ॥७९॥

[ पुरा जन्मन्यासं जिनवर ! तत्रोपास्तिनिरत–
स्ततो जन्मन्यस्मिन् समधिगतवांस्ते पदयुगम् ।
जनास्तीर्णास्तूर्णं सकृदपि भवन्तं प्रति नता,
भवं नाहं कस्मात्तदपि सपदि ब्रूहि भगवन् ! ॥८०॥ ]

वृत्तिः—जिनवर !–पार्श्वनाथार्हन् ! । पुरा जन्मनि–पूर्वभवे । तव–श्रीमतो भवतः । उपास्तिनिरतः–उपासनासक्तः । आसम्–अहमभवम् । ततः–तस्मात् कारणात् । अस्मिन्–इह । जन्मनि–भवे, मनुष्यजन्मन्यस्मिन्निति भावः । ते–भवतः । पदयुगम्–चरणद्वयम् । समधिगतवान्–प्राप्तवान् । सकृदपि–एकवारं खलु । भवन्तम्–श्रीमन्तमर्हन्तम् । प्रति–लक्ष्यीकृत्य । नताः–प्रणताः । जनाः–लोकाः । तूर्णम्–आशु । भवम्–संसारम् । तीर्णाः–अतरन् । अहम्–भवदुपासकः । कस्मात्–कुतो हेतोः । न–नहि । अतरमिति शेषः । भगवन्–पार्श्वप्रभो ! सपदि–शीघ्रम् । ब्रूहि–कथय । तत्कारणावगममन्तरेण न कथमपि मम चेतसि निर्वृत्तिरितिभावः ॥८०॥

[ अशेषोऽभूः पूर्वं तदनु निखिलं कर्म हतवान्,
कथं रोषाभावादरिनिकरनाशं विहितवान् ।
तदेतच्चित्रं वा तव चरितमाहात्म्यमथवा,
न तन्त्रं नीतीनां प्रभवति विशुद्धात्मनि परे ॥८१॥ ]

वृत्तिः—( भगवन् ! पार्श्वनाथ ! ) पूर्वम्—प्रथमम् । अरोषः—रोषरहितः । अभूः—अभवः,तत्रभवाँस्त्वमिति शेषः । तदनु—ततोऽनन्तरम् । निखिलम्—समस्तम् । कर्म—ज्ञानावरणीयादि । हतवान्—अवधीः । रोषाभावात्—क्रोधराहित्यात् । कथम्—केन प्रकारेण । अरिनिकरनाशम्—प्रतिपक्षकदम्बकविध्वंसम् । विहितवान्—कृतवान् । तदेतत्—रोषाभावसाहित्येन शत्रुसमूहमूलोन्मूलनमिदम् । चित्रम्—आश्चर्यकरम् । वा—अथवा । तव—श्रीमतः । चरितमाहात्म्यम्—चरित्रमहिमा । अथवा—अर्थान्तरन्यासे । नीतिनाम्—नयानाम्,नियमानामितियावत् । तन्त्रम्—सिद्धान्तः । 'तन्त्रं राष्ट्रे च सिद्धान्ते' इत्यनेकार्थः । परे—परमे । विशुद्धात्मनि—विमलरूपपरमात्मनि । न—नैव प्रभवति—समर्थं भवति॥८१॥

[ विशिष्टा शिष्टानां प्रणतिरथसम्पत्तिवरणं,<br>
तथैवोच्चस्थानस्थितिरपि महामानकरणम् ।<br>
नतेः स्वर्नाथानां समवसरणेऽत्युच्चपदवी—<br>
स्थितेश्चापि श्रीमान् ! किमजनि न ते मानकलिका॥८२॥ ]

वृत्तिः—श्रीमान् !—तत्रभवन् भगवन् पार्श्वनाथ ! । शिष्टानाम्—शिष्टजनानाम् । विशिष्टा—माहात्म्यप्रयोजिका, वैशिष्ट्यशालिनीतिशावत् । प्रणतिः—प्रणामः । अथ—समुच्चये । सम्पत्तिवरणम्—सम्पत्तिकर्तृकस्वीकरणम् । तथैव—तेन प्रकारेण खलु । उच्चस्थानस्थितिः—उन्नतास्थानावस्थानम् । अपि—सम्भावनायाम् । महामानकरणम्—सातिशयाभिमानासाधारणकारणम् । यद्यपि, तथापीतिशेषः । स्वर्नाथानाम्—देवेन्द्राणाम् । नतेः—नमस्कारात् । च—पुनः । समवसरणे—

देवविरचितधर्मोपदेशस्थानविशेषे । अत्युच्चपदवीस्थितेः—परमोन्नतपदावस्थानतः । अपि—खलु । ते-तव । मानकलिका-अभिमानाङ्कुरः । किम् ? -कथम् ? । न—नहि । अजनि-समभवत् । महामानापादककारणकलापे सत्यपि कथं न भवतो मानप्ररोहारोह इति महदाश्चर्य्यमेतत ॥८२॥

[ गुणश्रेण्यारूढस्त्वरितमपमायः समभव-
स्तथापि त्वन्माया प्रसरति समस्तेऽत्र भुवने ।
अहो माया शब्दस्त्वदनुसरणात् कामपि निजां,
न जाने मायां किं दधदिह कृपार्थं प्रथयते ॥८३॥ ]

वृत्तिः—( भगवन् पार्श्वनाथ ! ) गुणश्रेण्यारूढः—समारूढक्षपकश्रेणीकः । त्वरितम्—द्रुतम् । अपमायः—व्यपगतोपधिः, निकृत्यात्मतृतीयकषायविरहित इति यावत् । समभवः—जातः । तथापि—त्वयि मायाविरहितेऽपि । त्वन्माया—त्वदीयकृपा । 'स्यान्माया शाम्बरी कृपा । दम्भो बुद्धिश्चे'त्यनेकार्थः । समस्ते—निखिले । अत्र—अस्मिन् । भुवने—लोके । प्रसरति—विस्तारमयते । अहो !—आश्चर्यम् । मायाशब्दः—मायेति शब्दः । त्वदनुसरणात्—श्रीमत्तत्रभवद्भवदाश्रयणात् । कामपि—अनिर्वचनीयाम् । निजाम्—स्वीयाम् । मायाम्—छद्म । दधत्—धारयन् । इह-लोकेऽत्र । कृपार्थम्-कारुण्यात्मकमभिधेयम् । प्रथयते—विस्तारयति । किम् ?—सम्भावनायाम् । इति, न जाने—न जानामि । अथवा अहो ! न जाने मायाशब्दः त्वदनुसरणात् कामपि निजां मायां दधत् कृपार्थं प्रथयते किम् ? इति ॥८३॥

[ कषायांशं लोभं गणितरहितांशं त्वमकरो-
रलोभः सञ्जातस्तदनु भगवँस्तीर्थकृदहो ! ।
परं बाह्याभ्यन्तर्विविधविधसम्पत्तिकलनं,
प्रभोर्लोकं लोकोत्तरचरितवृत्तं ज्ञपयति ॥८४॥ ]

वृत्तिः—भगवन्—प्रभो ! । त्वम्, कषायांशम्—कषायाणां क्रोधमानमायालोभत्वेन प्रसिद्धानामंशोऽवयवः कषायांशस्तं तथा । लोभम्—तदाख्यम् । गणितरहितांशम्—असङ्ख्यातखण्डम् । समूलमुन्मूलयितुमिति । अकरोः—कृतवान् । ततश्च । अलोभः—लोभविरहितः । सञ्जातः—सम्भूतः । तदनु—तदनन्तरम् । तीर्थकृत्—तीर्थङ्करः । समजनीति शेषः । अहो !—आश्चर्यम् । परम्—किन्तु । तथापीति शेषः । बाह्याभ्यन्तर्विविधविधसम्पत्तिकलनम्— अष्टप्रातिहार्यादिबाह्यज्ञानादिकाभ्यन्तरसम्पत्तिवरणम् । लोकम्—जनम् । प्रभोः—परमेश्वरस्य । लोकोत्तरचरितवृत्तम्—अलौकिकाचारवृत्तान्तम् । ज्ञपयति—बोधयति, निवेदयतीति यावत् ॥८४॥

[ प्रभो ! दीनानाथस्त्वमसि नितरां कर्मरहित-
स्तथा दीनानाथः पुनरहमहो ! कर्मकलितः ।
कृपां कृत्वा कृत्वा दुरितनिचयं मां कुरु तथा,
यथा सम्प्राप्तः स्यां त्वमिव तव षष्ठीविधिमहम् ॥८५॥]

वृत्तिः—प्रभो !—भगवन् ! त्वम्— । नितराम्—अत्यन्तम् । कर्मरहितः—ज्ञानावरणीयादिकर्मविरहितः, अकर्मधारयश्चेति व्यज्यते । अत एव । दीनानाथः—दीनानां दुर्विधानाम् आ–समन्तात् नाथः स्वामी

तथा । असि—वर्तसे । तथा—तेन प्रकारेण । कर्मकलितः—अष्टविध-कर्मबन्धनबद्धः । कर्मधारयसमाससंवलितनामविशिष्टः । अहम्—पुनः—अपि । दीनानाथः—दीनश्चासौ अनाथस्तथा । अस्मीति शेषः । अहो !—अद्भुतमिदम् । कृपाम्—दयाम् कृत्वा—विधाय । दुरित-निचयम्—पापपुञ्जम् । कृत्वा—छित्वा । माम्—मल्लक्षणं जनम् । तथा—तादृशम् । कुरु—विधेहि । यथा—येन प्रकारेण । त्वमिव—भवानिव । तव—भवतः । षष्ठीविधिम्—षष्ठीं लेश्याम्, षष्ठीति सूत्रमिति व्यज्यते, तथा च षष्ठीसमासाश्रितोक्ताभिधान इति यावत् । अहम्-सम्प्राप्तः—समधिगतः । स्याम्—भवेयम् ॥८५॥

[ अहं विश्वामित्रः समजनिपि विश्वाहिततया,
प्रभो ! विश्वे मित्रं त्वमसि जनसन्तापहरणात् ।
निराकृत्याकारं कुरु कुरु कृपां मय्यतितमां,
भवेयं विश्वस्मिन् त्वमिव नियतं मित्रमचिरात् ॥८६॥ ]

वृत्तिः—प्रभो !—भगवन् ! अहम् !—विश्वाहिततया—विश्वं जगत् अहितममित्रं यस्य स विश्वाहितस्तस्य भावस्तत्ता तया तथा । विश्वामित्रः—विश्वममित्रं यस्य स तथा । त्वम्—पार्श्वस्त्वम् । जनसन्तापहरणात्—सकलजनपरितापापहरणतः । विश्वे—जगति । मित्रम्—सखा । असि । अतः । आकारम्—मदीयाभिधावर्तिनमाकारात्मकं वर्णम्, आकृतिं वा, अकारमिति वा । निराकृत्य—दूरीकृत्य । मयि—मल्लक्षणे जने । अतितमाम्—अत्यन्तम् । कृपाम्—अनुकम्पाम् । कुरु कुरु—द्रुतं विधेहि । ततश्च । त्वमिव—भवानिव, अहमपीतिशेषः ।

विश्वस्मिन्—सर्वत्र । अचिरात्—सत्त्वरम् । नियतम्—ध्रुवम् । मित्रम्—सुहृद् । भवेयम्—जायेय ॥८६॥

[ समाधिं मे हृत्वा जिनवर ! समाधिं वितरता-
दसारं मां सारं सपदि कुरु सारं वरतरम् ।
पराभूतिर्दूरं व्रजतु च पराभूतिरुपधिं,
विरूपं सद्रूपं भवति हि भवद्भक्तिविभवात् ॥८७॥ ]

वृत्तिः—जिनवर !—पार्श्वजिनराजेश्वर । मे—मम । समाधिम्—समः समस्तश्चासावाधिर्मानसी व्यथा समाधिस्तं तथा 'पुंस्याधिर्मानसी व्यथे'त्यमरः । हृत्वा—अपहृत्य । समाधिम्—एकाग्रतया ध्येयैकलीनतात्मकं ध्यानम् । वितरतात्—प्रयच्छतात् । सारम्—अरिनिकरपरिकरितम्, अरेः समूहः आरस्तेन सहितस्तं तथेति यावत् । अत एव असारम्—अबलम्, अविशिष्टमिति यावत् । माम्—मल्लक्षणं जनम् । सपदि—शीघ्रम् । वरतरम्—सातिशयम् । सारम्—प्रशस्तबलम् । कुरु—विधेहि । पराभूतिः—पराभवः । दूरम्—विप्रकृष्टम् । व्रजतु—यातु । च—पुनः । परा—उत्कृष्टा । भूतिः—ऐश्वर्यम् । उपधिम्—सान्निध्यम् । व्रजत्वित्यत्राप्यन्वेयम् । हि—निश्चयेन । भवद्भक्तिविभवात्—भवदीयसेवासम्पत्तेः । विरूपम्—अरुचिरम् । सद्रूपम्—शोभनस्वरूपम् । भवति—जायते । अर्थान्तरन्यासो विच्छित्तिविशेषविलासितो विरोधश्च ॥८७॥

[ अलं दानैः कोटीप्रमितकनकादेः प्रतिदिनं,
कृतं शीलैर्जन्मप्रभृतिविमलैः शीलिततमैः ।
तपोभिः पर्याप्तं भवतु शुभभावैरविरतं,
भवानेकश्चित्ते यदि सुरतरुः कामफलिनः ॥८८॥ ]

वृत्तिः—**प्रतिदिनम्**—प्रत्यहम्, दिने दिने इति यावत्। **कोटीप्रमितकनकादेः**—कोटिसङ्ख्यकसुवर्णदीनारप्रभृतेः। **दानैः**—वितरणैः। **अलम्**—सृतम्, नास्ति तैः किमपि प्रयोजनमित्यर्थः। **शीलिततमैः**—अत्यन्तपरिशीलितैः। **जन्मप्रभृतिविमलैः**—जन्मनः समारभ्य जीवनपर्यन्तमनाविलैः। **शीलैः**—ब्रह्मचर्यमुख्यसदाचारैः। **कृतम्**—व्यर्थम्। **तपोभिः**—बहुविधतपस्यया। **पर्याप्तम्**—अलम्। **अविरतम्**—सततम्। **शुभभावैः**—विमलविचारैः। **भवतु**—कृतम्। कस्यामवस्थायां किं वा सतीत्याह—भवानेकश्चित्त इत्यादि। **यदि**—चेत्। **भवान्**—श्रीमान् पार्श्वः। **एकः**—केवलः। 'एकोऽन्यार्थे प्रधाने च, प्रथमे केवले तथे'त्यमरः। **कामफलिनः**—अभिलाषानुरूपफलदः। **सुरतरुः**—कल्पवृक्षः। **चित्ते**—स्वान्ते। स्फुरतीतिभावः। सम्भावनालङ्कारः। 'सम्भावना यदीत्थं स्यादित्यूहोऽर्थविनिश्चये' इति चन्द्रालोकः ॥८८॥

**[ न ते गीतं गीतं श्रुतिविषयमानीतमथवा,**
**न ते रूपं दृष्टं प्रतिकृतिगतं कल्पितमपि।**
**न ते ध्यानं ध्यातं मनसि धृतिमाधाय भगवन्!,**
**न जाने संसारं कथमिव तरिष्यामि तदहम् ॥८९॥**

वृत्तिः—**भगवन्!**—प्रभो! पार्श्वनाथ। **ते**—तव। **गीतम्**—स्तुतिवचनम्। **न**—नहि। **गीतम्**—तारमधुरस्वरेण पठितम्। **अथवा**, **श्रुतिविषयम्**—श्रावणप्रत्यक्षगोचरम्। **आनीतम्**—प्रापितम्। **प्रतिकृतिगतम्**—प्रतिमाधिष्ठितम्। **कल्पितमपि**—काल्पनिकमपि। अपिना वास्तवस्य तु का कथेति भावः। **ते**—श्रीमतः। **रूपम्**—सद्रूपम्। **न**—नैव।

दृष्टम्—अवलोकितम्। मनसि—हृदये। धृतिम्—सन्तोषम्, धैर्य्यमिति। आधाय—धृत्वा। ते—भवतः। ध्यानम्—चिन्तनम्। न—न खलु। ध्यातम्—चिन्तितम्। तत्—ततश्च कारणतः। संसारम्—भवसागरम्। कथमिव—केन प्रकारेण। तरिष्यामि—पारयिष्यामि। इति, अहम्। न—नहि। जाने—जानामि। अर्हद्गीतगानश्रवणप्रतिमागतस्वरूपविलोकनादीनां संसारसागरतरणहेतुत्वात् काव्यलिङ्गम् ॥८९॥

[ महाव्याधिध्वंसप्रशमितसमस्ताधिनिकर-
प्रभावोद्भूतात्मप्रशमसमसद्भूतविभव !
पदं सर्वश्रेष्ठं परिचितमभूत्ते परतरं,
प्रयत्नानां सिद्धिः सकलभुवनेऽस्थापि भवता ॥९०॥ ]

वृत्तिः—महाव्याधिध्वंसप्रशमितसमस्ताधिनिकरप्रभावोद्भूतात्मप्रशमसमसद्भूतविभव !—महतो विशालस्य बहोश्च व्याधे रोगस्य ध्वंसेन विनाशेन प्रशमितः प्रशान्तः समस्तो निखिल आधिनिकरो मनोव्यथासमूहो यस्मात्तस्मात्प्रभावात् अनुभावात् उद्भूताभ्यां सञ्जाताभ्यामात्मप्रशमसमाभ्यां मनःप्रशान्तिसमताभ्यां सद्भूतः समुत्पन्नो विभव ऐश्वर्यं यस्य तदामन्त्रणे तथा। ते—श्रीमतः पार्श्वनाथस्य। परतरम्—उत्तमोत्तमम्। सर्वश्रेष्ठम्—सर्वोत्कृष्टम्। पदम्—आस्पदम्। परिचितम्—प्राप्तपरिचयम्। अभूत्—समजनि। भवता—श्रीमता तत्र पार्श्वनाथेन। सकलभुवने—समस्तजगति। प्रयत्नानाम्—पुरुषार्थानाम्। सिद्धिः—साफल्यम्। अस्थापि—स्थापिता ॥९०॥

[ कदाऽहं सद्भाग्योदयजनितसद्धर्मनिरतः,
प्रणष्टाष्टक्लेशप्रथनघनकर्मव्यतिकरः।

दिवानक्तं ध्यानं तव हि विदधानः स्वसमयं,
व्यतिष्यामि श्रद्धापुलकिततनुर्नाथ ! निभृतः ॥९१॥]

वृत्तिः—सद्भाग्योदयजनितसद्धर्मनिरतः—समीचीनभागधेयप्रकटीभावसमुत्पन्नसम्यग्धर्मसमासक्तः । प्रणष्टाष्टक्लेशप्रथनघनकर्मव्यतिकरः—विध्वस्ताष्टविधक्लेशविस्तारणनिबिडकर्मप्रपञ्चः । नाथ—स्वामिन् ! । श्रद्धापुलकिततनुः—सम्यग्दर्शनरोमाञ्चितशरीरः । हि—खलु । दिवानक्तम्—रात्रिन्दिवम् । तव—भवतः पार्श्वजिनेश्वरस्य । ध्यानम्—चिन्तनम् । विदधानः—कुर्वाणः । निभृतः—विनीतः । स्वसमयम्—निजकालम् । व्यतिष्यामि—नेष्यामि ॥९१॥

[ प्रभो ! त्रैलोक्यं त्वद्यशसि सरसि स्नातमभितो,
विशुद्धं सम्भूतं हिमकरकराद्वैतमगमत् ।
तथापि त्वद्वर्णः समजनि विवर्णो न भगवन् !,
किमेतद्वैचित्र्यं प्रभुचरितमाहात्म्यमथवा ॥९२॥ ]

वृत्तिः—प्रभो !—भगवन् ! । अभितः—सर्वतः । त्वद्यशसि—भवदीयवर्णवादात्मके । सरसि—तटाके । स्नातम्—अभिषिक्तम् । विशुद्धम्—विमलम्, विशदमिति यावत् । सम्भूतम्—सञ्जातम् । त्रैलोक्यम्—त्रिलोकी । हिमकरकराद्वैतम्—चन्द्रकिरणाभिन्नम्, तत्स्वरूपमितियावत् । अगमत्—प्राप्नोत् । यद्यपीतिशेषः । तथापि—त्रैलोक्यकर्तृकचन्द्रकिरणाद्वैतगमनेऽपि । भगवन् !—पार्श्वार्हन् । त्वद्वर्णः—भवद्वर्णः । विवर्णः—विरुद्धवर्णः, विगतवर्णो वा । न—नहि । समजनि—अभूत् । एतत्—तदेतत् । वैचित्र्यम्—वैलक्षण्यम् । अथवा—यद्वा ।

प्रभुचरितमाहात्म्यम्—भगवच्चरित्रप्रभावः। किम् ?—सम्भावनायाम्।
॥९२॥

[ अये वामामात ! त्वमसि सकलोदात्तचरितो—
वदान्यत्वं पूर्णं त्वयि पुनरपूर्वं लसति किम् ।
किमाहो माहात्म्यं सकलजनचेतोहरतरं,
विचित्रा यत् पुंसां श्रयति प्रकृतिस्त्वां परतरम् ॥९३॥ ]

वृत्तिः—अये !—आमन्त्रणार्थकमव्ययम्। वामामात !—वामा तदभिधाना प्रशस्ता माता जननी यस्य तदामन्त्रणे तथा। 'मातुर्मातः पुत्रेऽर्हे सिनामन्त्र्ये' इत्यनेन प्रशस्तपुत्रेऽर्थे आमन्त्रणे सिना सह मातृशब्दस्य मातादेशः। त्वम्—त्वंपदवाच्यः। सकलोदात्तचरितः—सर्वातिशयचरित्रः। असि—वर्तसे। पुनः—अथ च। अपूर्वम्—नवीनम्। पूर्णम्—परिपूर्णम्। वदान्यत्वम्—दानशौण्डत्वम्। त्वयि—भवति। लसति—शोभते। किम्—प्रश्नार्थकमव्ययम्। अहो—अथवा। सकलजनचेतोहरम्—लोकमात्रहृदयाकर्षणम्। माहात्म्यम्—प्रभुत्वम्। किम् ?—किमु। यत्—यतो हेतोः। विचित्रा—विलक्षणापि। पुंसाम्—जनानाम्। प्रकृतिः—स्वभावः। त्वाम्—श्रीमन्तं भवन्तम्। परतरम्—अतिश्रेष्ठतया। श्रयति—अङ्गीकुरुते।

कथा का ते ख्यातेः कृतविपुलसातेश्वर ! भवत्—
प्रभावादन्येषामपि भवति नो कूटघटना ।
न कः प्राणी वाणीरसहृतजगन्मानसतृषं,
श्रयेत त्वां नाथं दलितघनमायामृषमतः ॥९४॥

वृत्तिः—ईश्वर !—परमेश्वर ! कृतविपुलसात !—विहित-पुष्कलसौख्य ! ते—भवतः । ख्यातेः—प्रसिद्धेः । कथा—वार्ता । का—न काऽपीत्यर्थः । भवत्प्रभावात्—श्रीमतोऽनुभावतः । अन्येषाम्—परेषाम् । अपि—अपिना किं पुनः स्वेषामिति । कूटघटना—कपटरचना । नो भवति—न च जायते, न प्रभवतीत्यर्थः । अतः—अस्माद्धेतोः । कः—कीदृक् । प्राणी—सचेतनश्चेतनः । वाणीरमहृतजगन्मानसतृषम्—वाङ्माधुर्यापाकृतभुवनजनमनस्तृष्णम् । दलितघनमायामृषम्—विनिवारितनिबिडकैतवासत्यम् । नाथम्—स्वामिनम् । त्वाम्—भवन्तम् । न—न खलु । श्रयेत—सेवेत । अपि तु सर्वोऽपि प्राणी त्वामवश्यं सेवेतेत्यर्थः ॥१४॥

भवान् चक्री कर्मव्रजविकटवैताढ्यघटितं,
कपाटं ग्रन्थ्याख्यं सुपरिणतिदण्डाद् विघटयन् ।
प्रतीर्य्योद्यद्वीर्य्यो जयति सकलासद्ग्रहजलं,
प्रपूर्णेच्छ ! म्लेच्छव्रजसदृशमिथ्यात्वविजयात् ॥१५॥

वृत्तिः—प्रपूर्णेच्छ !—परिपूर्णाभिलाष ! भगवन् ! कर्मव्रजविकटवैताढ्यघटितम्—कर्मव्रजात्मक एव विकटो वैताढ्यस्तत्र घटितं सङ्घटितं स्थितमिति ग्रन्थ्याख्यम्—रागद्वेषयोर्निबिडपरिणामो ग्रन्थिस्तदभिधम् । कपाटम्—अररम् कवाटमितियावत् । सुपरिणतिदण्डात्—सम्यक्परिणामात्मकदण्डरत्नात् । विघटयन्—विश्लेषयन्, समुद्घाटयन् इतियावत् । उद्यद्वीर्य्यः—समुदयमानबलः । सकलासद्ग्रहजलम्—निखिलासमीचीनाग्रहात्मकोन्मग्नानिमग्नावारि । प्रतीर्य्य—पारयित्वा ।

**म्लेच्छव्रजसदृशमिथ्यात्वविजयात्**—किरातशबरादिम्लेच्छसमूहसमानस्य मिथ्यात्वस्य विजयतः, म्लेच्छं मिथ्यात्वं पराजित्येति यावत् । **भवान्**—श्रीमान् पार्श्वार्हन् । **चक्री**—चक्रवर्ती भूत्वा । **जयति**—विजयते । रूपकम् ॥९५॥

मता देवाः सुभ्रूस्तनजघनसेवासु—रसिका,
महादम्भारम्भाः प्रकृतिपिशुनास्तेऽपि गुरवः ।
दयाहीनो धर्मः श्रुतिविदितपीनोदय इति,
प्रवृद्धं मिथ्यात्वं सुसमयघरट्टैर्दलितवान् ॥९६॥

वृत्तिः—**सुभ्रूस्तनजघनसेवासु-रसिकाः**—मृगाक्षीपयोधरजघनस्थलसेवायां सुरसिका तत्सेवासु रसिका आसक्ता वा कामिनीकामपरिचर्य्यापरायणा इति यावत् । **देवाः**—देवतत्त्वप्रतिष्ठिताः । **मताः**—सम्मताः । **महादम्भारम्भाः**—महामायाश्रितसंरंभसमारम्भतत्पराः । **प्रकृतिपिशुनाः**—स्वभावेनैव परापवादमुखराः । मायाविनः पापाचरणा दुष्टा दुर्जनाश्चेति यावत् । **तेऽपि**—एतादृशोऽपि । **गुरवः**—गुरुतत्त्वप्रतिष्ठिताः । **श्रुतिविदितपीनोदयः**—श्रुत्या वेदेन विदितः प्रसिद्धः पीनः पुष्ट उदयो यस्य यत्र वा तादृशः, श्रुतिविहितपीनोदय इति पाठेतु वेदविहितपुष्टाभ्युदय इति । **दयाहीनः**—कारुण्यविरहितः । यज्ञादिहिंसाकार्यसमुपदेशकत्वात् । **धर्मः**—धर्मतत्त्वप्रतिष्ठितः । **इति**—उक्तरूपेण । **प्रवृद्धम्**—वृद्धिङ्गतम्, जगति बहुजनानुसरणात् । **मिथ्या**—असत्यम् । **त्वम्**—भवान् । **सुसमयघरट्टैः**—समीचीनसिद्धान्तात्मकपेषणयन्त्रविशेषैः । **दलितवान्**—अपिषत्, सञ्चूर्णयामासेतियावत् ॥९६॥

परं देवं त्वत्तो न खलु गणयामि क्षणमपि,
त्वदादिष्टादिष्टाद् गुरुमपि पथः प्रच्युतमिह ।

सहे नान्यं धर्मं नृपसदसि जल्पव्रजमहे,
महेश ! त्वं तस्मान्मयि कुरु दयां शश्वदुदयाम् ॥९७॥

वृत्तिः—**महेश !**—भगवन्! **त्वत्तः**—भवतः। **परम्**—अन्यम्। **इह**—अस्मिन् जगति। **देवम्**—देवत्वेन। **क्षणमपि**—निमेषसमयमात्रमपि। **न खलु**—नैव। **गणयामि**—मन्ये। **त्वदादिष्टात्**—भवदुपदिष्टात्। **इष्टात्**—अभिमतात्, धर्म्यादितियावत्। **पथः**—मार्गात्। **प्रच्युतम्**—संस्खलितम्। **गुरुम्**—गुरुत्वेन। **अपि**—पुनः। न खलु गणयामीतिशेषः। **नृपसदसि**—राजसभायाम्। **जल्पव्रजमहे**—जल्पात्मककथाविशेषसमवायविलासोत्सवे सत्यपीतिशेषः। **अन्यम्**—भगवदुक्तान्यम्। **धर्मम्**—धर्मत्वेन। **न**—नैव। **सहे**—क्षमयामि। **तस्मात्**—ततः कारणात्। **त्वम्**—पार्श्वस्त्वम्। **मयि**—ममोपरि। **शश्वदुदयाम्**—प्रतिक्षणजायमानाभ्युदयाम्। **दयाम्**—अनुकम्पाम्। **कुरु**—विधेहि। काव्यलिङ्गम् ॥९७॥

भयं सर्वं याति क्षयमुदयति श्रीः प्रतिदिनं,
विलीयन्ते रोगा लसति शुभयोगादपि सुखम्।
महाविद्यामूलं सततमनुकूलं त्रिभुवना-
भिराम त्वन्नाम स्मरणपदवीमृच्छति यदि ॥९८॥

वृत्तिः—**त्रिभुवनाभिराम !**—लोकत्रयकमनीय!। **महाविद्यामूलम्**—परमविद्यादिकारणम्। **सततम्**—सदाकालम्। **अनुकूलम्**—अनुगुणम्। **त्वन्नाम**—भवदभिधानम्। **यदि**—चेत्। **स्मरणपदवीम्**—स्मृतिपथम्। **ऋच्छति**—प्राप्नोति। **तदा**—यच्छब्दस्योत्तरवाक्यगतत्वेन

पूर्वत्र तदेति सामर्थ्याल्लब्धमास्ते । सर्वम्—मृगेन्द्रमत्तमतङ्गजसरीसृपानलसङ्ग्रामाम्बुनिधिबन्धनमहाव्याधिजनितं समस्तम् । भयम्—साध्वसम् । क्षयम्—विध्वंसम् । याति—प्राप्नोति । श्रीः—शोभा, सम्पत्तिर्लक्ष्मीर्वा । प्रतिदिनम्—सर्वदा । उदयति—समेधते । रोगाः—व्याधयः । विलीयन्ते—विनश्यन्ति । शुभयोगात्—पुण्यसम्पर्कात् । सुखम्—शर्म । अपि—खलु । लसति—विलसति । भवदीयं नामस्मरणं सर्वारिष्टप्रशमनपूर्वकसकलसुखसम्पत्तिदायकमिति भाव ॥९८॥

नमदमर्त्यकिरीटमणिप्रभा,—पटलपाटलपादनखत्विषे ।
गलितदोषवचोधुतपाप्मने, शुभवते भवते भगवन्! नमः ॥९९॥

वृत्तिः—भगवन्!—प्रभो! नमदमर्त्यकिरीटमणिप्रभापटलपाटलपादनखत्विषे—नमतां प्रणामं कुर्वताम् अमर्त्यानां देवानाम्, किरीटमणीनां मुकुटरत्नानां प्रभापटलैः कान्तिनिकरैः पाटला पाटलवर्णा लोहिता पादयोश्चरणयोः नखानां नखराणां त्विट् कान्तिर्यस्य तस्मै तथा । गलितदोषवचोधुतपाप्मने—गलितदोषेण दूषणरहितेन वचसा देशनावचनेन धुतो दूरीकृतः पाप्मा पापं येन तस्मै तथा । एतादृशाय । शुभवते—कल्याणशालिने । भवते—तुभ्यम् । नमः—नमस्कारः । भवत्विति शेषः । द्रुतविलम्बितम् ॥९९॥

सुरतरुः फलितो मम साम्प्रतं, विगलितोऽपि च दुष्कृतसञ्चयः ।
सुरमणी रमणीयभवन्नुतेः, करतले रतलेपहराऽलुठत् ॥१००॥

वृत्तिः—भवगन्!, रमणीयभवन्नुतेः—कमनीयभवदीयस्तुतिकरणात् । मम—मल्लक्षणस्य । कृते इति यथोचितं शेषः । सुरतरुः—कल्पवृक्षः । फलितः—अफलत् । च—पुनः । दुष्कृतसञ्चयः—पाप-

समूहः । **अपि**–खलु । **विगलितः**–विध्वस्तः । **रतलेपहरा**–रतानां रतेभ्यो वा अनुरक्तानामनुरक्तेभ्यो वा पदार्थानां पदार्थेभ्यो यो लेपः अवलेपः गर्व इति यावत् । तस्य हरा अपहर्त्री सा तथा । **सुरमणी**–चिन्तामणिः, अत्र दीर्घेकारान्तो मणीशब्दः, यद्वा 'रोरेलुग्' इत्यादिना दीर्घताऽनुसन्धेया । सुन्दरकामिनीरूपार्थकरणे तु रतलेपहरेत्यस्य गृहीतरतार्थलेपा, कामविलासाहङ्कारापहर्त्री वेत्यर्थो विधेयः । **करतले**–हस्तान्तरे । **अलुठत्**–सँल्लुठिताऽभवत् । यमकम्, वृत्तं पूर्ववत् ॥१८०॥

**दिशति कार्मणमीश ! शिवश्रियः, प्रियसमागमहेतुरनुत्तरः ।**
**विजयते विहतोत्कटसङ्कट–व्युपरमा परमा तव संस्तुतिः ॥१०१॥**

वृत्तिः—**ईश !**–परमात्मन् ! **विहितोत्कटसङ्कटव्युपरमा**–कृतात्यर्थविपत्तिविरामा । **परमा**–उत्कृष्टा । **तव**–श्रीमतो भवतः । **संस्तुतिः**–सम्यक्स्तवः । **शिवश्रियः**–मोक्षलक्ष्म्याः । **कार्मणम्**–समाकर्षणमूलकर्म । **दिशति**–समादिशति । अत एव । **अनुत्तरः**–अनुत्तमः; अत्युत्तम इतियावत् । **प्रियसमागमहेतुः**–अभिलषितसंप्राप्तिनिदानम् । **विजयते**–सर्वोत्कर्षेण वर्तते ॥१०१॥

**तव मतं यदि लब्धमिदं मया, किमपरं भगवन्नवशिष्यते ।**
**सुरमणौ करशालिनि किं धनं, स्थितमुदीतमुदीश ! पराङ्मुखम् ॥१०२॥**

वृत्तिः—**भगवन्**–परमात्मन् । **यदि**–चेत् । **मया**–मल्लक्षणेन त्वद्भक्तेन । **इदम्**–एतत् । **तव**–श्रीमतो भवतः । **मतम्**–सिद्धान्ततत्त्वम् । **लब्धम्**–समधिगतम् । तर्हीति शेषः । **अपरम्**–अन्यत् । **किम्**–प्रश्नवाचकम् । **अवशिष्यते**–अतिरिच्यते, अधिकमास्त इतिया-

वत् । ईश—परमेश्वर ! सुमरणौ—चिन्तामणौ । करशालिनि—हस्ता-लङ्कारिणि, पाणिपद्मस्थिते इतियावत् । उदीतमुत्—उदीता-उदयमधि-गता प्राप्तोदया मुत्-हर्षो यस्मात् तत्तादृशं तथा, प्रमोदावहमित्यर्थः । उदीतेति उत्पूर्वकाद्गत्यर्थकादीधातोः साधनीयम् । किम्—किमात्मकम्, कीदृशमितियावत् । धनम्—ऐश्वर्य्यम् । पराङ्मुखम्—विमुखम् अन-वाप्तमितियावत् । स्थितम्—अस्थात् । अपितु न किमप्यनवाप्तमस्था-दिति यावत् ॥१०२॥

सर्पत्कन्दर्पसर्पस्मयमथनमहामन्त्रकल्पेऽत्र कल्पे,
प्रत्यक्षे कल्पवृक्षे परमशुभनिधौ सत्तमोहे तमोहे ।
निर्वाणानन्दकन्दे त्वयि भुवनरवौ पावना भावना भा-
ध्वस्तध्वान्ते समग्रा भवतु भवतुदे सङ्गता मे गतामे ॥१०३॥

वृत्तिः—भगवन् पार्श्वनाथ ! अत्र—अस्मिन् । कल्पे—युगे, समये इतियावत् । सर्पत्कन्दर्पसर्पस्मयमथनमहामन्त्रकल्पे—सर्पतः प्रसरतः कन्दर्पसर्पस्य यः स्मयस्तस्य मथने मथनाय वा महामन्त्रकल्पस्त-स्मिँस्तथा । प्रत्यक्षे—साक्षात् । कल्पवृक्षे—सकलसमीहितपूरकसुरतरु-स्वरूपे । परमशुभनिधौ—समुत्कृष्टकल्याणाकरे । सत्तमोहे—सातिशय-सज्जनजनविचारविषयीभूते । तमोहे—अज्ञानान्धकारविध्वंसके । निर्वाणानन्दकन्दे—परमपदाह्लादमूलभूते । भुवनरवौ—त्रिभुवनादित्ये । भाध्वस्तध्वान्ते—प्रभाविनाशिततिमिरे । गतामे—सर्वव्याधिविमुक्ते । भवतुदे—संसारविनाशके । त्वयि—श्रीमति भवति । पावना—पवित्रा । भावना—चिन्तनम् । समग्रा—पूर्णा । भवतु—जायताम् । यमकम् । स्रग्धरा ॥१०३॥

**प्रसीद सद्यो भगवन्नघं, हरस्व पुण्यानि पुषाण भर्तः ।**
**स्मर्तव्यतामेति न कश्चिदन्य-स्त्वमेव मे देव ! निषेवणीयः ॥१०४॥**

वृत्तिः—भगवन्-प्रभो ! सद्यः—सपदि, तत्क्षण इति यावत्। **प्रसीद**—प्रसन्नो भव। **अघम्**—पापम्। **हरस्व**—दूरीकुरु। **भर्तः !**—स्वामिन् !। **पुण्यानि**—सुकृतानि। **पुषाण**—पोषय, वर्द्धयेतियावत्। **अन्यः**—भवद्भिन्नः। **कश्चित्**—कश्चन। **स्मर्तव्यताम्**—स्मरणविषयताम्। **न**—नहि। **एति**—गच्छति, आयातीतियावत्। भवदतिरिक्तः कश्चिन्न स्मरणपदवीमुपयातीति भावः। **देव !**—देवाधिदेव !। **मे**—मम। **त्वम्**—भवान्। **एव**—नूनम्। **निषेवणीयः**—सेव्यः। असीत्यध्याहार्यम्। उपजातिः ॥१०४॥

**हरिदन्तिसरीसृपानल-प्रधनाम्भोनिधिबन्धरोगजाः ।**
**न भियः प्रसरन्ति देहिनां, तव नामस्मरणं प्रकुर्वताम् ॥१०५॥**

वृत्ति—**तव**—भवतः। **नामस्मरणम्**—अभिधानस्मृतिम्। **प्रकुर्वताम्**—विदधताम्। **देहिनाम्**—प्राणिनाम्। **हरिदन्तिसरीसृपानलप्रधनाम्भोनिधिबन्धरोगजाः**—पञ्चानन-मत्तमतङ्गज-नाग-महावह्नि-सम्पराय-महोदधि-बन्धन-महाव्याधिजनिताः। **भियः**—भयानि। **न**—नहि। **प्रसरन्ति**—विस्तरन्ति, समुत्पद्यन्तेऽपीति यावत्। यदुक्तम्—
'मत्तद्विपेन्द्रमृगराजदवानलाहि - सङ्ग्रामवारिधिमहोदरबन्धनोत्थम्। तस्याशुनाशमुपयाति भयं भियेव, यस्तावकं स्तवमिमं मतिमानधीते' इति। ( छन्दः सुन्दरी ) ॥१०५॥

**चिदानन्दनिस्यन्दवन्दारुशक्र-**
**स्फुरन्मौलिमन्दारमालारजोभिः ।**

**पिशङ्गौ भृशं गौरकीर्तेस्तवाङ्घ्री,**
**गलल्लोभ ! शोभाभिराम ! स्मरामः ॥१०६॥**

वृत्ति—**गलल्लोभ !**—गलन् विनश्यन् लोभो यतः स तदामन्त्रणे। **शोभाभिराम !**—दीप्तिललाम ! । **चिदानन्दनिस्यन्दवन्दारुशक्रस्फुरन्मौलिमन्दारमालारजोभिः**—ज्ञानानन्दप्रवाहेण वन्दनशीलसुरेन्द्रस्य प्रचलन्मस्तकस्य कल्पद्रुकुसुमस्रजो रजोभिः, चिदानन्दनिस्यन्देति पृथगामन्त्रणमपि सुष्ठु । **पिशङ्गौ**—पिङ्गलवर्णौ । **गौरकीर्तेः**—उज्ज्वलयशसः । **तव**—श्रीमतोऽत्रभवतो भवतः । **अङ्घ्री**—चरणौ । **भृशम्**—वारंवारम् । यद्वा भृशं पिशङ्गावित्यन्वेयम् । **स्मरामः**—चिन्तयामः । काव्यलिङ्गम् । भुजङ्गप्रयातवृत्तम् ॥१०६॥

**बहुधाऽत्र सुधारुचिरैर्वचनै-र्भवता भवतापभरः शमितः ।**
**अमितप्रसरद्गुणरत्ननिधे !, शरणं चरणौ तव तेन भजे ॥१०७॥**

वृत्तिः—**अमितप्रसरद्गुणरत्ननिधे !**—अमितानाम् अपरिमितानाम् प्रसरतां गुणरत्नानां भुवनव्यापिनां ज्ञानाद्युत्तमगुणानां निधिः तदामन्त्रणे तथा । **अत्र**—लोकेऽस्मिन् । **भवता**—श्रीमता भवता पार्श्वनाथेन । **सुधारुचिरैः**—पीयूषमनोरमैः । **वचनैः**—देशनावचोभिः । **बहुधा**—अनेकधा । **भवतापभरः**—संसारसन्तापसमुच्चयः । **शमितः**—शान्तिं नीतः, विध्वंसित इतियावत् । **तेन**—तेन हेतुना । **तव**—श्रीमतो भवतः । **चरणौ**—पादपङ्कजे । **शरणम्**—आश्रयम्, रक्षणं वा । **भजे**—समाश्रये, सेवे इतियावत् । तोटकं वृत्तम् ॥१०७॥

**इति प्रथितविक्रमः क्रमनमन्मरुन्मण्डली-**
**किरीटमणिदर्पणप्रतिफलन्मुखेन्दुः शुभः ।**

जगज्जनसमीहितप्रणयनैककल्पद्रुमो,
यशोविजयसम्पदं प्रवितनोतु वामाङ्गजः ॥१०८॥

वृत्तिः—इति—दर्शितप्रकारेण । प्रथितविक्रमः—विश्रुतपराक्रमः । क्रमनमन्मरुन्मण्डलीकिरीटमणिदर्पणप्रतिफलन्मुखेन्दुः—क्रमयोश्चरणयोर्नमन्त्या नम्रीभवन्त्या मरुन्मण्डल्या देवश्रेण्याः किरीटानां मुकुटानां मणिषु रत्नेष्वेव दर्पणेषु मुकुरेषु प्रतिफल —प्रतिबिम्बतामाचरन् मुखेन्दुर्वदनचन्द्रमा यस्य स तादृशः । शुभः—मङ्गलः । जगज्जनसमीहितप्रणयनैककल्पद्रुमः—समस्तसत्त्वसमभिलषितसम्पादनासदृशसुरतरुः । वामाङ्गजः—श्रीवामातनूजन्मा भगवान् श्रीपार्श्वनाथ इतियावत् । यशोविजयसम्पदम्—यशः कीर्तिः, विजयो जयस्तयोः सम्पत् उत्कर्षः तां तथा । अथ यशोविजय इति निजनाम तस्य सम्पदं दर्शनाद्यतिशयसम्पत्तिम् । प्रवितनोतु—अक्षयं यथा स्यात्तथा वितरतु । पृथ्वीछन्दः । रूपकमलङ्कारः ॥१०८॥

प्रभोर्वमियस्य स्तवनमवनं यद् व्यरचयन्,
यशोमुख्याभिख्याः कवनकुशला वाचकवराः ।
विवृत्त्या सद्वृत्त्या सहितमहितं हर्तुमभितः,
समीकृत्यादोपि स्वपरपरिबोधाय तदिदम् ॥१॥

गुरोर्विजयनेमितो विजयनेमिसूरीशितुः,
कृपामृतसूरिणः परमपुण्यपूर्णामितः ।
धुरन्धर उदाहरद् विवरणं तु गोडीस्थितेः,
स्तवस्य परमेशितः किमपि पार्श्वनाथार्हतः ॥२॥

# શ્રી જૈન સાહિત્ય વર્ધક સભા-પ્રકાશિત-ગ્રંથો.

| | | |
|---|---|---|
| ૧ | પરમાત્મસંગીતરસસ્રોતસ્વિની | ૦-૮-૦ |
| ૨ | સપ્તસંધાન મહાકાવ્ય | ૪-૦-૦ |
| ૩ | સાહિત્ય શિક્ષામંજરી | ૨-૦-૦ |
| ૪ | વૈરાગ્ય શતક | ૧-૪-૦ |
| ૫ | શ્રી તત્ત્વાર્થાધિગમ સૂત્ર | ૩-૦-૦ |
| ૬ | આદિ જિન પંચકલ્યાણક પૂજા | ૦-૪-૦ |
| ૭ | ગિરિનારજી તીર્થનો પરિચય | ૦-૪-૦ |
| ૮ | સંગીતસ્રોતસ્વિની | ૦-૬-૦ |
| ૯ | ઇન્દુદૂતમ્ | ૨-૦-૦ |
| ૧૦ | નિહ્નવવાદ | ૩-૦-૦ |
| ૧૧ | શિવભૂતિ | ૦-૩-૦ |
| ૧૨ | નયવાદ | ૦-૪-૦ |
| ૧૩ | આત્મવાદ | ૦-૧૦-૦ |
| ૧૪ | વિચાર સૌરભ | ૦-૪-૦ |
| ૧૫ | તત્ત્વાર્થ સ્વાધ્યાય | ૦-૪-૦ |
| ૧૬ | સિરિજંબૂસામી ચરિતં | ૧-૪-૦ |
| ૧૭ | સુપાત્ર દાનનો મહિમા | ૦-૮-૦ |
| ૧૮ | સિદ્ધચક્ર નવપદારાધન વિધિ | ૩-૦-૦ |
| ૧૯ | સિદ્ધચક્રસ્વરૂપ દર્શન | ૦-૮-૦ |
| ૨૦ | અર્હત્-પ્રાર્થના | ૦-૪-૦ |
| ૨૧ | સ્વાધ્યાયરત્નાવલિ (ખંડ ૧) | ૧-૪-૦ |
| ૨૨ | વજ્રસ્વામી-આખ્યાન | ૦-૬-૦ |
| ૨૩ | ચંદ્રપ્રભજિન પંચકલ્યાણક પૂજા | ૦-૪-૦ |
| ૨૪ | પુણ્યપ્રકાશસ્તવનાદિ | ૦-૬-૦ |

| | | |
|---|---|---|
| ૨૫ | મોહનવિજયજીકૃત ચોવીસી | ૧–૪–૦ |
| ૨૬ | સંસ્કારનું વાવેતર | ૦–૪–૦ |
| ૨૭ | સ્વાધ્યાય રત્નાવલિ (ખંડ–૨) | ૧–૪–૦ |
| ૨૮ | દર્શનરત્નરત્નાકર (ભા–૧) | ૮–૦–૦ |
| ૨૯ | સ્નાત્રપૂજાદિ | ૦–૬–૦ |
| ૩૦ | અષ્ટાપદજીની પૂજા | ——— |
| ૩૧ | નવ્વાણું અભિષેકની પૂજા | ——— |
| ૩૨ | દર્શન રત્નરત્નાકર (ભા–૨) | ૮–૦–૦ |
| ૩૩ | શ્રી સિદ્ધહેમ–સિદ્ધહેમ સરસ્વતી યુક્ત (ખંડ ૧) | ૫–૦–૦ |
| ૩૪ | કલ્પલતાવતારિકા | ૫–૦–૦ |
| ૩૫ | હિતશિક્ષા છત્રીશી. | ૧–૪–૦ |
| ૩૬ | (૧) દર્શનરત્ન રત્નાકર (ભા. ૩) | ૯–૦–૦ |
| ૩૬ | (૨) દેવસીરાઈ પ્રતિક્રમણાદિ સૂત્ર | ૦-૧૦-૦ |
| ૩૭ | (૧) શંબલ | ૧–૮–૦ |
| ૩૭ | (૨) પંચપ્રતિક્રમણાદિ સૂત્ર | ૧–૮–૦ |
| ૩૮ | કલ્પસૂત્ર–ખીમશાહી | ૧૨–૫૦ |
| ૩૯–૪૦ | શ્રી શાંતિસ્નાત્રાદિવિધિ સમુચ્ચય તથા સિદ્ધચક્ર યંત્ર મહાપૂજનવિધિ | ૫–૦–૦ |
| ૪૧ | પર્યુષણાષ્ટાહ્નિકાવ્યાખ્યાન | ૨–૫૦ |
| ૪૨ | હિતચિંતન | ૧–૨૫ |
| ૪૩ | (૧) વર્ધમાન–મહાવીરાષ્ટક | ૦–૨૫ |
| ૪૩ | (૨) વિધિસસુચ્ચય–પ્રતિષ્ઠા કલ્પ | ૫–૦ |
| ૪૪ | લક્ષણવિલાસ | ૨–૦ |
| ૪૫ | ગોડીપાર્શ્વજિનસ્તોત્ર | ૨–૫૦ |